# SANSKRIT

**अपठित गद्यांश**

**गद्यांशान् पठित्वा प्रश्ननाम् उत्तराणि लिखत।**

1. एकदा पंजाबराज्यस्य नृपः महाराजः रणजीतसिंहः आखेटाय सैनिकैः सह वनमगच्छत। ते एकस्मिन् स्थाने वृक्षस्य अधः वार्ताम् कुर्वन्ति स्म तदैव एकं प्रस्तरं तस्य दक्षिणे नेत्रे अपतत्। तेन तस्य तन्नेत्रे अतीव पीड़ा उत्पन्ना अभवत् तस्माच्च नेत्रात् रक्तबिन्दवः अपि अपतन्। महाराजः पीडया तत्रैव उपविशत्। तदा तस्य सैनिकाः एकां स्त्रीं गृहीत्वा तत्रानयन्। ते कथितवन्तः– ''नृपेन्द्र! इयमेव अपराधिनि महिला भवन्तं पीड़ितम् अकरोत् अतः एतस्यै दण्डयतु भवान्।'' नृपः ताम् अवदत् – ''अहं तव अपराधी नासम्। त्वां प्रति किञ्चत् कथितमपि न। पुनः कथं त्वं। माम् आहतं कृतवती ?'' रोदन्ती सावदत् – ''महाराज! गृहे मम बालाः बुभुक्षिताः सन्ति, अतः अहं प्रस्तरखण्डैः एतस्य वृक्षस्य फलानि अत्रोटयम्। परं दुर्दैववशात् प्रस्तरं भवन्तं अपीडयत्। क्षमस्व माम्। अहम् अज्ञाने एवं ईदृशं कृतवती। पुनः कदापि ईदृशम् अपराधं न भविष्यति।'' इदं श्रुत्वा दयालुः नृपः तां स्त्रीम् अमोचयत्।

**I. एकपदेन उत्तरत।** 2

क) नृपस्य नाम किमासीत् ?

ख) नृपस्य नेत्रात् के अपतन् ?

ग) नृपः कीदृशः आसीत् ?

घ) के एकां स्त्री गृहीत्वा तत्रानयन् ?

**II. पूर्णवाक्येन उत्तरत।** 2

क) सैनिकाः किं कथितवन्तः ?

ख) ते कुत्र वार्तां कुर्वन्ति स्म ?

**III. भाषिककार्यम्।** 4

क) 'अतः एतस्मै दण्डयतु भवान्।' अत्र कर्तृपदं किम् ?

i) एतस्मै ii) दण्डयतु iii) भवान् iv) अतः

ख) 'गृहे मम बालाः........................।' अत्र 'मम' पदं कस्मै प्रयुक्तम् ?

i) स्त्रियै ii) नृपाय iii) सैनिकाय iv) वृक्षाय

ग) 'दयालुः नृपः' अत्र विशेषणपदं किम् ?

i) नृपः ii) दयालुः iii) नृप iv) दया

घ) अनुच्छेदे 'पाषाणम्' इति पदस्य कः पर्यायः आगतः ?

i) एवार्ताम् ii) नृपम् iii) अपराधम् iv) प्रस्तरम्

**IV. अस्य गद्यांशस्य उचितं शीर्षकं लिखत।** 2

2. एकस्मिन् ग्रामे एकः वृद्धः वसति स्म। तस्य त्रयः पुत्राः आसम्। त्रयोऽपि पुत्राः बुद्धिमन्तः आसन्। तथापि सः वृद्धः निश्चयम् अकरोत् यत् सः स्वक्षेत्रम्, भूमिं धनस्वार्णादिकम् च तस्मै एव दास्यति यः सर्वाधिकः बुद्धिमान् सिद्धः भवष्यिति। एकस्मिन् दिने सः वृद्धः सर्वान् पुत्रान् आहूय उक्तवान् – ''हे पुत्राः! यष्मासु यः मम कक्षं सर्वं पूरयेत् अहं तस्मै स्वसम्पत्तिं दास्यामि। यूयं सर्वे एवं बुद्धिमन्तः स्थ। गच्छत, प्रयासं च कुरुत।'' तदा जयेष्ठःपुत्र एकां शकटिकां पूरययित्वा कार्पासम् आनयत्, परं एतेन कक्षस्य एकः एव भागः पूरितः जातः। कतिपयदिवसपर्यन्तं विचार्य मध्यमः पुत्र एकस्मिन् दिने शुष्क – तृणानि आनीय कक्षे स्थापितवान्। परम् एतेन अपि कक्षः रिक्तः एव जातः। अन्ते कनिष्ठस्य पुत्रस्य वारः आसीत्। सः क्षणं विचिन्त्य एकं दीपकम् आनीय तम् दीपकं प्रज्ज्वलितवान्। दीपकस्य प्रकाशेन समग्रः कक्षः शीघ्रम् एव पूरितः जातः। प्रकाशमयं कक्षं दृष्ट्वा प्रसन्नः च भूत्वा जनकः सर्वां सम्पत्तिं तस्मै अददात्।

**I. एकपदेन उत्तरत।** 2

क) कस्य प्रकाशेन समग्रः कक्षः पूरितः जातः ?

ख) वृद्धस्य कति पुत्राः आसन् ?

ग) अन्ते कस्य वारः आसीत् ?

घ) कः सर्वां सम्पत्तिं अददात् ?

**II. पूर्णवाक्येन उत्तरत।** 2

क) वृद्धः पुत्रान् आहूय किमकथयत् ?

ख) कनिष्ठः पुत्रः किम् अकरोत् ?

**III. भाषिककार्यम्।** 4

क) ‘कक्षे’ स्थापितवान्’ इति क्रियापदस्य गद्यांशे कतृपदं किम् अस्ति ?

i) कनिष्ठः पुत्रः ii) मध्यमपुत्रः iii) वृद्धः iv) ज्येष्ठ पुत्रः

ख) ‘अहं’ स्वसम्पत्तिम् तस्मै दास्यामि’। अत्र ‘तस्मै’ इति सर्वनामपदं कस्मै प्रयुक्तम् ?

i) पुत्राय ii) कनिष्ठपुत्राय iii) वृद्धाय iv) मध्यमपुत्राय

ग) ‘सम्पूर्णः’ इति पदस्य पर्यायपदं चित्वा लिखत।

i) पूरितः ii) रिक्तः iii) समग्रः iv) शून्य

घ) ‘दीपकम्’ इति पदस्य किं विशेषणपदम् ?

i) सर्वम् ii) क्षणम् iii) एकम् iv) प्रकाशमयम्

**IV. अस्य गद्यांशस्य उचितं शीर्षकं लिखत।** 2

3. मम प्रियं पुस्तकं रामायणम् असित। असिमन् ग्रन्थे मर्यादापुरुषोत्तामस्य श्रीरामस्य जीवनस्य वृतं वर्तते। अस्य लेखकः महिर्षः वाल्मीकिः आसीत्। सः आदिकविः आसीत्, अतः तस्य रचनां ‘आदिकाव्यम्’ इति कृत्वा विद्वांसः स्मरन्ति। एतत् काव्यम् अनुष्टुप–छन्दसि निबद्धम्। अत्र श्लोकानां संख्या चतुर्विंशतिसहस्रं वर्तते, तेन रामायणं ‘चतुर्विंशति–साहस्त्री संहिता’ इति नाम्ना अपि विद्वद्भिः स्मर्यते। इदं कविना नारदमुनेः प्रेरण्या ब्रह्मणः वचनेन च रचितम्। रामयणे ‘बालकाण्डं उत्तरकाण्डं च अवान्तरकालिकं प्रक्षेपं मन्यन्ते। तत्र श्रीरामस्य प्रमुखतः महुरुषरुपेण वर्णनं वर्तते।

**I. एकपदेन उत्तरत।** 2

क) रामायणे कस्य महापुरुषस्य जीवननस्य वृतं वर्तते ?

ख) रामायणं केन अन्येन नाम्ना विद्वद्भिः स्मर्यते ?

**II. पूर्णवाक्येन उत्तरत।** 2

क) रामायणस्य सप्त काण्डानां नामानि लिखत।

ख) कविना रामायणं कस्य प्रेरणा कस्य वचनेन च रचियतम् ?

**III. प्रदत्तविकल्भेयः उचितम् उत्तरं चित्वा लिखत।** 4

क) ‘रचितम्’ इति क्रियापदस्य कर्तृपदं किम् ?

i) रामायणम् ii) विद्वांसः iii) श्रीरामः iv) कविना

ख) ‘अस्य लेखकः’ अत्र ‘अस्य’ इति सर्वनामपदं कस्मै प्रयुक्तम् ?

i) श्रीरामाय ii) जीवनाय iii) रामायणाय iv) वाल्मीकिने

ग) ‘महर्षिः’ इति पदस्य अनुच्छेदे विशेष्यं किम् ?

i) वाल्मीकिः ii) लेखकः iii) कविना iv) प्रियम्

घ) ‘मूर्खा’ इति पदस्य कः विपर्ययः अनुच्छेदे प्रयुक्तः ?

i) पुस्तकम् ii) कविः iii) रामायणम् iv) विद्वांसः

**IV. अस्य गद्यांशस्य उचितं शीर्षकं लिखत।** 2

4. यदि मनः प्रसन्नम् अस्ति तर्हि वयं सर्वाणि कार्याणि सम्यक् कर्तुं शक्नुमः। मनः खिन्नम् असन्तुष्टं वा अस्ति चेत् अस्माकम। प्रेरणा न भवति। अतः मनसः प्रसन्नतारक्षण्म् अत्यन्तम् आवश्यकम्। जयपराजययोः आरम्भः अपि जनानां मनसि भवति। स्नेहस्य शत्रुतायाः आरम्भः अपि तेषां मनसि एव भवति। जनैः सर्वदा भावात्मकचिन्तनं करणीयम्। अभावात्मकचिन्तनकर्ता जीवने सर्वत्र कष्टानि एव अनुभवति। अत एक उक्तम् – ‘‘मन एव मनुष्याणां कारणं वन्धमोक्षयोः’’।

**I. एकपदेन उत्तरत।** 2

क) बन्धमोक्षयोः कारणं किम् अस्ति ?

ख) कस्य प्रसन्नतारक्षणम् आवश्यकम् अस्ति ?

**II. पूर्णवाक्येन उत्तरत।** 2

क) कः जीवने सर्वत्र कष्टानि अनुभवति ?

ख) कदा वयं सर्वाणि कार्यणि सम्यक् कर्तुं शक्नुमः?

**III. प्रदत्तविकपेभ्यः उचितम् उत्तरं चित्वा लिखत।** 4

क) ‘शक्नुमः’ इति क्रियापदस्य किं कर्तृपदं गद्यांशे प्रयुक्तम् ?

i) कर्ता ii) मनः iii) वयम् iv) कार्याणि

ख) ‘अथवा’ इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

i) अपि ii) वा iii) तर्हि iv) एव

ग) ‘आरम्भः’ इतिपदस्य किं क्रियापदम् अनुच्छेदे प्रयुक्तम् ?

i) शक्नुमः ii) करणीम् iii) मनसि iv) भवति

घ) गद्यांशे ‘तेषाम्’ इति सर्वनामपदं केभ्यः प्रयुक्तम् ?

i) कष्टेभ्यः ii) कार्येभ्यः iii) जनेभ्यः iv) जीवनेभ्यः

**IV. अस्य गद्यांशस्य उचितं शीर्षकं लिखत।** 2

5. क्रोधः मनुष्यस्य महान् शत्रुः। कुद्धः जनः गुरुन् अपि निन्दति, अपभाषाणं करोति, ज्येष्ठानां हितवचानि अपि न

श्रृणोति। तस्माद् वयं क्रोधे सावधानाः भवेम। यदि क्रोधः आगच्छति तदा तस्मिन् एव क्षणे मौनं धारणीयम्। मौनेन मनः शान्तं भवति। वाणी अपि नियन्त्रिता भवति। ईदृशे काले किञ्चित् पुस्तकं गृहीत्वा पठेम। कोपात् सर्वदा आत्मनं रक्षेम।

**I. एकपदेन उत्तरत।** 2

क) क्रोधे आगते किं धारणीयम् ?

ख) क्रुद्धः जनः केषां हितवचनानि न श्रृणेति ?

**II. पूर्णवाक्येन उत्तरत।** 2

क) मनुष्यस्य महान् शत्रुः कः ?

ख) मौनेन वाणी कीदृशी भवति ?

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।** 4

क) 'क्रुद्ध' इति कस्य पदस्य विशेषणम् ?

i) गुरोः ii) जनस्य iii) श्त्रोः iv) ज्येष्ठस्य

ख) 'भवेम' इति क्रियापदस्य किं कर्तृपदं गद्यांशे प्रयुक्तम् ?

i) जनः ii) वाणी iii) क्रोधः iv) वयम्

ग) 'सर्वस्मिन् काले' इत्यर्थे किम् अव्ययपदं गद्यांशे प्रयुक्तम् ?

i) सर्वदा ii) नियन्त्रिता iii) तस्मिन् एव iv) अपि

घ) 'असावधानाः'' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

i) नियन्त्रिता ii) सर्वदा iii) सावधानाः iv) शान्तम्

**IV. अस्य गद्यांशस्य उचितं शीर्षकं लिखत।** 2

## पत्रलेखनम्

1. **भवति शिवाली अस्ति। भवती संस्कृतस्य पुस्तकमेलकम् प्रदर्शिनीं च दुष्टवती। स्व भगिनीम् अपर्णाम् प्रति लिखिते अस्मिन् पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तशब्दैः पूरयित्वा पत्रं पुनः लिखत।** 5

पंजाबीबागः
i) __________
तिथिः __________
प्रिय अपर्णे!
सस्नेहं ii) __________
अत्र कुशलं तत्र अस्तु। अहं तुभ्यम् एकं समाचारं दातुम् iii) __________यत् गतमासे मया एकम् अपूर्वम् पुस्तकमेलकम् प्रदर्शिनी च दृष्टा। अनुमीयताम् किमर्थम् एतत् अपूर्वम् आसीत् ? वस्तुतः दिल्लीनगरे विश्वसंस्कृतसम्मेलनम् आयोजितम् आसीत् तत्र विश्वस्य भिन्नभागेभ्यः iv) __________आगताः आसन् ।तेषम् मध्ये विविधविषयेषु चर्चा अभवत्। सायंकाते संस्कृतस्य v) __________अभिनयः अभवत् अस्मिन् अवसरे अन्तः राष्ट्रियम् संस्कृतपुस्तकमेलकम् अपि vi) __________वेदाः, उपनिषदः, योगविज्ञानस्य ग्रन्थाः, चरकसंहिता, पाणिनेः अष्टाध्यायी, इत्यादयः अस्माकं मनस्सु अपूर्वम् vii) __________उत्पन्न अकुर्वन्। तत्र रामायणमहाभारतादीनां पाण्डुलिपियः अपि प्रदर्शिताः viii) __________। शेषं मिलित्वा कथयिष्यामि। मातापित्रोः चरणयोः मम प्रणामान् ix) __________।
तव भगिनी।
x) __________

**मञ्जूषाः** विद्वांस, आनन्दम्, नमोनमः, आयोजितम्, शिवाली, नाटकानाम्, आसन्, इच्छामि, निवेदय, दिल्लीतः

2. **भवत्याः नाम सुनीता। भवत्याः सखी रमा संस्कृतं पठितुं भवत्याः परामर्शं वाञ्छति। तां प्रेरयितुं लिखितं पत्रं मञ्जूषायाः सहायतया पूरयित्वा तत्पत्रं पुनः उत्तरपुस्तिकायां लिखतु।** 5

ए20, जनकपुरी
i) __________
तिथिः __________
प्रिय ii) __________
नमस्ते।
भवत्याः पत्रं प्राप्तम्। भवती संस्कृतभाषां पठितुम् इच्छति, iii) __________पठित्वा मे प्रसन्नतायाः सीमा नास्ति। एषा भाषा सर्वाधिका iv) __________। संस्कृतम् अस्माकं देशस्य प्रतिष्ठा। वेदाः, उपनिषदः, रामायणं, महाभारतं, पराणानि, महाकाव्ययनि, कथासाहित्यम् इत्यादिकं सर्वं v) __________अत्यन्तं मार्गदर्शकं, ज्ञानवर्धकं प्रेरणाप्रदं च अस्ति। vi) __________संस्कृतं पृथक् कर्तुं तथैव न शक्यते यथा पुष्पेभयः सुगन्धम्। संस्कृतेन सम्भाषणम् अस्माकं ह्रदयेषु vii) __________वर्धयति, हीनभावनां च नाशयति। अतः त्वम् अवश्यं viii) __________पठ, पठित्वा च ix) __________कुरु। एवं वयम् भारतमातुः सेवां कृत्वा धन्याः भवाम।
सर्वेभ्यः अग्रजेभ्यः मम प्रणामाः अनुजेभ्यः च आशीर्वादाः

भवत्याः सखी
x) __________
**मञ्जूषाः** वैज्ञानिको, प्रचारं, वाङ्मयम्, सुनीता, भारतीयसंस्कृतेः, रमे, इति, गौरवं, संस्कृतं, नवदिल्लीतः

3. **भवान् प्रणवः स्वमित्रं पत्रं लिखति। अधोलिखिते एतस्मिन् पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तशब्दैः पूरयित्वा पत्रं पुनः लिखत।** 5

शलीमार बागः
i) __________
तिथिः __________
प्रिय मित्र गोविन्द!
सस्नेहं ii) __________
अत्र कुशलं तत्रास्तु। त्वया लिखित iii) __________प्राप्तम्। एतत् ज्ञात्वा अहम् अतीव प्रसन्नः यत् त्वया वार्षिक iv) __________प्रथमं पारितोषिकं प्राप्तम्। अस्माकं विद्यालये अपि संस्कृत दिवसस्य v) __________ भविष्यति। अस्मिन् वर्षे 'अभिज्ञानशाकुन्तलम्' इति vi) __________मञ्चनं vii) __________। विद्यालये तव उपस्थित्या मम viii) _________अपि भविष्यति। अतः अवश्यम् आगच्छ। पत्रोत्तरस्य पतीक्षायाम्। तव ix) ________मित्रम्।
x) __________
**मञ्जूषाः** पत्रम्, दिल्लीतः, उत्साहवर्धनम्, नमोनमः, क्रीड़ासमारोहे, अभिन्नं, प्रणवः, नाटकस्य, भविष्यति, आयोजनम्


4. **भवान् सुरेशः! संस्कृतसम्भाषणशिविरविषये स्वमित्रं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तशब्दैः पूरयित्वा पत्रं पुनः लिखत।** 5

रोहिणी सै0 9
i) __________
तिथिः __________
प्रिय मित्र रोकेश!
सस्नेहं ii) __________
अत्र सर्वगतं कुशलम्। मन्ये भवान् अपि iii) __________। गतसप्ताहे अस्माकं विद्यालये संस्कृत–सम्भाषणशिविरम् iv) __________आसीत्। दश दिनानि यावत् वयम् संस्कृते सम्भाषणस्य v) __________ कृतवन्तः। एकस्याः लघुनाटिकायाः मञ्चनम् vi) __________अकुर्म। अहम् तु विदूषकस्य vii) __________कृतवान्। सर्वे जनाः हिसत्वा वारं वारं करतलध्वनिं अकुर्वन्। अहम् तु इदानी सर्वदा संस्कृतेन एव वदामि। मम शिक्षिका अपि viii) _________स्नेहं करोति। त्वम् अपि प्रयत्नं कुरु। नूनं यशस्वी भविष्यसि। पितरौ ix) ________मम प्रणामाञ्जलिं निवेदयतु।
तव x) __________
सुरेशः
**मञ्जूषाः** नमस्ते, अभ्यासम्, दिल्लीतः, प्रति, कुशली, अभिनयम्, मयि, आयोजितम्, वयम्, अभिन्नहृदयः


(चित्र वर्णनम्)
**मञ्जूषायाम् प्रदत्तशब्दानाम् सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत।**

1.  10


**मञ्जूषाः** क्रीडाक्षेत्रम्, छात्राः, विद्यालयस्य, क्रीडन्ति, परदकन्दुकेन, क्रीडाकालांशे, विकासः, भवति, क्रडाशिक्षकः, अस्ति, क्रीडनेन, अतिविशालम्, स्वस्थाः

2.  10

**मञ्जूषाः** समुद्रतटः, बालाः, कन्दुकम्, तरङ्गैः, नौकाः, क्रीडन्ति, बालुकाभिः रचयन्ति, पादेन, गृहम् समुद्रविहारम्, मित्रैः, सह

3. 

**मञ्जूषा:** वने, धावति, वानराः, वृक्षाः, कूर्दन्ति, सिंहः, पुष्पाणि, गजः, भल्लूकाः, मृगौ, उष्ट्रः, वृक्षेषु, इतस्ततः 10

4. 

**मञ्जूषा:** बालकाः, उद्याने, वृक्षाः, क्रीडन्ति, प्रसन्नाः, तिष्ठतः, पुष्पाणि, व्यायामम्, वृद्धः, कन्दुकेन, गच्छति, स्त्रियौ, परस्परम् 10

5. 

**मञ्जूषा:** उद्यानम्, अवकाशः, भ्रमणार्थम्, जनाः, बालिकाः, बालकाः, भोजनम्, वृक्षाः, अधः, क्रीडन्ति, खादन्ति, भ्रमन्ति, सन्ति, कन्दुकेन, परदपाः, अस्ति, नद्याः, तटे, सर्वे, प्रसन्नाः 10

## सन्धि

अधोलिखितेषु वाक्येषु रेखांकितपदानाम् सन्धिविच्छेदं वा सन्धिं चित्वा लिखत।

1. चन्द्रोदयः सर्वेभ्यः रोचते । 1
   क) चन्द्रः + उदयः   ख) चन्द्रो + दय   ग) चन्द्रो + उदयः   घ) चन्द्र + उदयः
2. देवर्षिः नारदः नारायण–नारायण कथयति। 1
   क) देवर् + ऋषि   ख) देव + ऋषिः   ग) देवाः + ऋषिः   घ) देवर् + षिः
3. कपयः राजभवने प्राप्तान् स्वर्गसमानोपभोगान् त्यक्तुं च इच्छन्ति। 1
   क) स्वर्गसमा + नोपभोगान्   ख) स्वर्गसमान + उपभोगान्
   ग) स्वर्गसमानो + पभोगान्   घ) स्वर्गसमानोप + भोगान्
4. विपरीतोपसेविनः मित्ररुपाः रिपवः भवन्ति। 1
   क) विपरीत् + उपसेविनः   ख) विपरीतः + उपसेविनाः
   ग) विपरीत + उपसेविनः   घ) विपरीत + उपसेविनेः
5. अयं याचकः केनापि प्रेरितः स्यात्। 1
   क) केन + अपि   ख) के + नापि   ग) केना + अपि   घ) केन + अपि
6. तदैव सा विहस्य अवदत्। 1
   क) तदा + अएव   ख) तद् + ऐव   ग) तदा + एव   घ) तदै + एव
7. एकदा युधिष्ठिरः वने पिपासा + आकुलः अभवत्। 1
   क) पिपासआकुलः   ख पिपासा आकुलः   ग) पिपासाकुलः   घ) पिपासोऽकुलः
8. यक्षः युधिष्ठिरम् अवदत् – भो! प्रथमं मम प्रश्नस्योत्तरं देहि। 1
   क) प्रश्नस्य + उत्तरम्   ख) प्रश्नस्या + उत्तरम्   ग) प्रश्न+ युत्तरम्   घ) प्रश्नस्य् + उत्तरम्
9. सः बालकः चं+चलः अस्ति। 1
   क) चम्चलः   ख) चंचलः   ग) चञ्चलः   घ) चन्चलः
10. सहसा + एव एकः सिहः तत्र आगच्छत्। 1
   क) सहसेव   ख सहसोव   ग) सहसैव   घ) सहसौव

11. माता नवौदनं पचति। 1
क) नव + ओदनम् ख) नव + औदनम् ग) न + ओदनम् घ) ना + ओदनम्

12. यौवनं धनं चायुः। 1
क) च + आयुः ख) चायः + उः ग) च + अयुः घ) चा + युः

13. इत्युक्तिस्तत्कृतज्ञता। 1
क) इति + उक्तिः + तत् + कृत्ज्ञता ख) इत्युक्तिः + तत्कृतज्ञता
ग) इत्यु + उक्तिस् + तत्कृज्ञता घ) इत्उक्तिः + तत्कृतज्ञता

14. परमापद्गतेनापि नैव प्रयोक्तव्यम्। 1
क) परम + आपत् + गतेन + अपि ख) परमापद् + गतेनापि
ग) परमापदत + ऐनापि घ) परम + आपत्गतेनापि

15. सः पावनं रामचरितं पठति। 1
क) पाव + अनम् ख) पौ + अनम् ग) पाव् + अनम् घ) पो + अनम्

16. सर्वे जनाः पारम् + गताः सन्ति। 1
क) पारन्गताः ख पारम् गताः ग) पारंगताः घ) पारगताः

17. ज्ञाने + अपि शक्तिः वर्तते। 1
क) ज्ञानेपि ख) ज्ञाने अपि ग) ज्ञाननि घ) ज्ञानेऽपि

18. फलम् + प्राप्य अहम्मानी मा भव। 1
क) फलं प्राप्य ख) फलम्प्राय ग) फलन्प्राय घ) फलङ्.प्राप्य

19. षट् + नाम् छात्राणां नामानि कानि ? 1
क) षटनाम् ख) षड्नाम् ग) षण्णाम् घ) षड्.नाम्

20. तज्जपः तदर्थ भावनम्। 1
क) तत + अर्थ ख) तत् + अर्थ ग) ततः + अर्थ घ) तो + अर्थ

21. कृषकः क्षेत्रंगतः आसीत्। 1
क) क्षेत्रम् + गतः ख) क्षेत्रड्. + गतः ग) क्षेत्रे+ + गतः घ) क्षेत्रन् + गतः

22. कामात् क्रोधोऽभिजायते। 1
क) क्रोधेत् + अभिजायते ख) क्रोधोभि + जायते ग) क्रोधः + अभिजायते घ) क्रोधोभि + अजायते

23. अथ अर्जुन उवाच। 1
क) अर्जुनः + उवाच ख) अर्जुनो + उवाच ग) अर्जुनस् + उवाच घ) अर्जुन + उवाच

24. वैद्यराज! नमस्कारम्। 1
क) नम + कारम् ख) नमो + कारम् ग) नमः + कारम् घ) नमस् + कारम्

25. कश्चौरः आगतः अत्र ? 1
क) कस् + चौरः ख) कः + चौरः ग) क + चौरः घ) को + चौरः

## समास

रेखांकितपदानाम् समासं विग्रहं वा विकल्पेभ्यः चित्वा लिखत।

1. काकः मेध्यम् अमेध्यम् सर्वं भक्षयति। 1
क) न अमेध्यम् ख) अनमेध्यम् ग) न मेध्यम् घ) अमेध्यम् न

2. मयूरः राष्ट्रपक्षी कथ्यते। 1
क) राष्ट्राणां पक्षी ख) राज्ञः पक्षी ग) राष्ट्रस्य पक्षी घ) राष्ट्रेः पक्षी

3. सर्वं पक्षिकुलं त्वया अवमानितम्। 1
क) पक्षे कुलम् ख) पक्षीणाम् कुलम् ग) पक्षिषु कुलम् घ) पक्षि कुलम्

4. पिता पुत्राय बाल्ये विद्याधनं दीयते। 1
क) विद्ययाः धनम् ख) विद्याः धनम् ग) विद्याया धनम् घ) विद्यायै धनम्

5. विवकेः तत्वार्थनिर्णयः कर्तुं शक्नोति। 1
क) तत्त्वस्य अर्थाणम् निर्णयः ख) तत्त्ववानाम् अर्थस्य निर्णयः
ग) तत्त्वार्थाणाम् निर्णयः घ) तत्त्वार्थस्य निर्णयः

6. अकातरः परैः न परिभूयते। 1
क) न अकातरः ख) नाकतरः ग) न कातरः घ) अनाकातरः

7. विद्वद्वचः सदाचारं प्राणेभ्योऽपि विशेष : मन्येते। 1
क) विदुषि वचः ख) विद्वांसः वचः ग) विदुषां वचः घ) विद्वान्वचः

8. सदाचारं हितकरं भवति। 1
क) सतां आचारं ख) सज्जनानां आचारः ग) सत् आचारम् घ) सदा चारम्

9. भारतभूमिः वीरजननी अस्ति। 1
क) वीरस्य जननी ख) वीराणां जननी ग) वीरेषु जननी घ) वीराः जननी

10. कः पुत्रस्य शोकेन संतप्तः आसीत् ? 1

क) पुत्रशोकेसंतप्तः ख) पुत्रशोकात्संतप्तः ग) पुत्रशोकसंतप्तः घ) पुत्रशोकंसंप्तः

11. भीमः पुत्रशोकसंतप्तः आसीत्। 1

क) पुत्रशोकेन संतप्तः ख) पुत्रेण शोकसतंप्त ग) पुत्राय शोकसंतप्तः घ) पुत्रेषु शोकसंतप्तः

12. इदमस्त्रम् अपाण्डवाय अस्ति। 1

क) पाण्डवस्य न ख) पाण्डवेन न ग) पाण्डवाय न घ) न पाण्डवाय

13. आग्नेयास्त्रे चलिते सर्वत्र ज्वालमालाः व्याप्ताः। 1

क) ज्वालाः मालाः ख) ज्वालानाम् मालाः ग) ज्वालाभिः मालाभिः घ) ज्वालाय मालाः

14. द्रौपदी पुत्रशोकविह्वला आसीत्। 1

क) पुत्रशोकात् विह्वला ख) पुत्रशोकाय विह्वला ग) पुत्रशोकेन विह्वला घ) पुत्राय शोकः विह्वला

15. सः तस्य मनोवृत्तिम न जानाति। 1

क) मनोः वृतिम् ख) मनः वृत्तिम् ग) मनसः वृत्तिम् घ) मनसि वृत्तिम्

16. युधिष्ठिरः, भीमः, द्रौपदी च रणभूमौ प्रविशन्ति। 1

क) रणात् भूमौ ख) रणस्य भूमौ ग) रणे भूमौ घ) रणौ भूमौ

17. अश्वत्थामा द्रोणपुत्रः आसीत्। 1

क) द्रोणस्य पुत्रः ख) द्रोणात् पुत्रः ग) द्रोणाय पुत्रः घ) द्रोणेः पुत्रः

18. वयम् सभागारे प्रतीक्षां कुर्मः। 1

क) सभा–आगरे ख) सभायाः आगारे ग) सभायै आगारे घ) सभायाः गारे

19. तत्र कानि प्रमुखानि आजीविकासाधनानि ? 1

क) आजीविकायाः साधनानि ख) आजीविकायै साधनानि

ग) आजीविका–साधनानि ग) आजीविकात् साधनानि

20. सुशोभिता इयम् सूर्यादयभूमिः। 1

क) सूर्योदयस्य भूमिः ख) सूर्योदयात् भूमिः ग) सूर्योदयः भूमिः घ) सूर्योदयानां भूमिः

21. अध्यापकः प्रश्नोत्तरमाध्यमेन छात्रान् सम्बोध्यति। 1

क) प्रश्नोत्तरस्य माध्यमेन ख) प्रश्नोत्तराणम् माध्यमेन

ग) प्रश्न–उत्तरस्य माध्यमेन घ) प्रश्नस्य उत्तरेण माध्यमेन

22. अरुणाचलस्य वनसम्पदा विपुला वर्तते। 1

क) वनम् सम्पदा ख) वनानि सम्पदा ग) वनानाम् सम्पदा घ) वनात् सम्पदा

23. तस्य प्रदेशस्य पुष्पसमृद्धिः मनोहरा वर्तते। 1

क) पुष्पाणि समृद्धिः ख) पुष्पाणाम् समृद्धिः ग) पुष्पम् स्मृद्धिः घ) पुष्पस्य समृद्धि

24. मिथुनः एकः विशिष्टः राजपशुः वर्तते। 1

क) राजस्य पशुः ख) राजानं पशुः ग) राज्ञः पशुः घ) राजः पशुः

25. तवाड्.गोम्पा एकः प्रसिद्धः बौद्धमठः अस्ति। 1

क) बौद्धस्य मठः ख) बौद्धानां मठः ग) बौद्धः मठः घ) बौद्धात् मठः

**प्रत्ययाः**

**अधेलिखितवाक्येषु रेखांकितपदानां प्रकृतिप्रत्यययोः संयोजनं विभाजनं वा विकल्पेभ्यः चित्वा लिखत।**

1. भगवान् बोधिसत्त्वः अपूर्वः धैर्य + मतुप् अपि आसीत्। 1

क) धैर्यमान् ख) धैर्यमान्यः ग) धैर्यवान् घ) धैर्यवत्

2. तस्य दानशीलता लौकिकी नासीत्। 1

क) लोक + इकी ख) लौक + इकी ग) लोक + ईक घ) लोक + ठक्

3. अभिमानी कदापि सुखं नन विन्दति। 1

क) अभिमान + इन् ख) अभिमान + ड्.ीप् ग) अभिमान + इनी घ) अभिमान + ई

4. त्यागी बोधसत्त्वः अमात्यान् अपि न अमन्यत। 1

क) त्याग + ड्.ीप् ख) त्याग + ई ग) त्याग + इ घ) त्याग + इन्

5. विद्या रुपि धनं सदैव सुखकरं भवति। 1

क) रूप + इनी ख) रूप + इन् ग) रूप + ड.ीप् घ) रू॰ + ईन्

6. श्रद्धा + मतुप् ज्ञानं लभते। 1

क) श्रद्धामत् ख) श्रद्धामान् ग) श्रद्धावान् घ) श्रद्धावानम्

7. लोके दानिनः धन्याः। 1

क) दानि + नः ख) दा + निनः ग) दान + इन् घ) दान + मतुप्

8. सर्वव्यसनविनाशे दक्षः एव त्यागी। 1

क) त्यज् + इन् ख) त्याग + इन् ग) त्याग + ई घ) त्या + गिन्

9. वीराः अभ्युदये क्षमा + मतुप् भवन्ति। 1

क) क्षमामन्तः ख) क्षमावन्ताः ग) क्षमामन्ताः घ) क्षमावन्तः

10. पर्यावरणक्षणम् अस्मांक नीति + ठक् कर्तव्यम्। 1
क) नीतिकम् ख) नितिकम् ग) नैतिकम् घ) नेतिकम्

11. नृपेण प्रजाः पाल् + अनीयर्। 1
क) पालनीयम् ख) पालनीयाः ग) पालनीयः घ) पालित्व्याः

12. सदैव शुद्धं जलं पातव्यम्। 1
क) पा + तव्यम् ख) पा + तव्यत् ग) पा + तव्य घ) पिब् + तव्यत्

13. तेन तत्र न स्था + तव्यत्। 1
क) स्थातव्यत् ख) स्थातव्या ग) स्थातव्यम् घ) स्थातव्यः

14. न्यायधीशेन न्यायः करणीयः। 1
क) कृ + अनीयर् ख) कृ + अनीयः ग) कृ + अनीया घ) कृ + अनीयत्

15. असमाभिः समये विद्यालयः गम् + तव्यत्। 1
क) गम्तव्यः ख) गन्तव्यः ग) गन्तव्या घ) गन्तव्यम्

16. त्व्या लताः आरोपयितव्याः। 1
क) आरोप् + त्वयः ख) आरोप् + त्वयाः ग) आ + रोप् + तव्यत् घ) आरोप् + तव्यम्

17. तेन नियमाः ज्ञातव्याः। 1
क) ज्ञा + तव्यत् ख) ज्ञा + तव्यम् ग) ज्ञा + अनीयर् घ) ज्ञा + तव्याः

18. गुरुः सदैव वन्द्र + अनीयर् भवति। 1
क) वन्दनीयम् ख) वन्दनीया ग) वन्दनीयः घ) वन्दयः

19. कार्येषु कदापि शीघ्रता न कृ + तव्यत्। 1
क) कर्तव्यम् ख) कर्तव्या ग) करणीया घ) करणीयम्

20. त्वया तत्र न स्थातव्यम्। 1
क) स्था + तव्यः ख) स्था + तव्यम् ग) स्था + तव्यत् घ) स्था + तव्याः

21. ज्ञानत्वं कदापि न निन्दनीयम्। 1
क) दान + त्व ख) ज्ञान + तवम् ग) ज्ञान + त्व घ) ज्ञान + त्वम्

22. दानत्वम् एव महनीयं वर्तते। 1
क) दान + त्व ख) दान + तव ग) दान + तवम् घ) दान + त्वम्

23. लघुत्वं सर्वथा अनुचितं नास्ति। 1
क) लघु + त्वम् ख) लघु + त्व ग) लघु + तव घ) लघु + तवम्

24. स्वरत्वं मधुरं भवेत्। 1
क) स्वर + त्व ख) स्वर + त्वम् ग) स्वरत् + त्व घ) स्वर + तव

25. उदारता सदैव प्रशंसनीया अस्ति। 1
क) उदार + तल् ख) उदार + ता ग) उदार + तल घ) उदार + तलः

## वाच्यप्रकरणम्

1. **द्वे मित्रे परस्परं वार्तालापं कुरुतः। अनिलः कर्तृवाच्ये राकेशः कर्मवाच्ये वदति। वाच्यानुसारं रिक्तस्थाननि पूरयत।** 3

अनिलः राकेश! किं भवतः गृहे दूरदर्शनम् वर्तते न वा ?
क) राकेशः – मित्र! मम i) __________न क्रीतम्।
ख) अनिलः – तव पिता कथं न ii) __________?
ग) राकेशः – दूरदर्शनेन अध्ययने बाधा iii) __________।

2. **द्वौ बालकौ वार्तालापं कुरुतः। (एकः) अंशुमान् कर्तृवाच्ये, (द्वितीयः) कपिलः कर्मवाच्ये वदति। वाच्यानुसारं रिक्तस्थाननि पूरयत।** 3

अंशुमान् – कपिल!
क) i) __________अधुना किं करोषि ?
ख) कपिलः – मित्र! ii) __________अधुना विज्ञानम् पठयते।
ग) अंशुमान् – अहम् तु दूरदर्शने समाचारान् iii) __________।

3. **चेटी वसन्तसेना च वार्तालापं कुरुतः। चेटी कर्तृवाच्ये वसन्तसेना कर्मवाच्ये वदति। वाच्यानुसारं रिक्तस्थाननि पूरयत।** 3

क) चेटी–वसन्तसेने! उक्राष्ठतु i) __________।
ख) वसन्तसेना– कुत्र ii) __________गन्तव्यम् ?
ग) चेटी–यत्र चारुदत्तः iii) __________।

4. **मयूर–पिकौ परस्परं वार्तालापं कुरुतः। मयूरः कर्तृवाच्ये पिकः कर्मवाच्ये वदति। वाच्यानुसारं रिक्तस्थाननि पूरयत्।** 3

क) मयूरः– पिक! त्वं मधुरं i) __________ ।
ख) पिकः– मयूर! त्वया वर्षर्तौ सुन्दरं ii) __________ ।
ग) मयूरः – iii) __________ केवलं वसन्तकाले मधुरेण स्वरेण कूजसि।

5. **वाल्मीकेः आश्रमे वटवः लवः व वार्तालापं कुर्वन्ति। वटवः कर्तृवाच्ये लवः कर्मवाच्ये वदति। वाच्यनुसारं रिक्तस्थाननि पूरयत।** 3

क) वटवः– कुमार! आश्चर्यं i) __________ ।
ख) लवः – मया ii) __________! नूनम् आश्वमेधिकोऽयम् अश्वः।
ग) वटवः– त्वं कथं iii) __________ ?

6. **शक्रः कर्णः च वार्तालापं कुरुतः। शक्रः कर्तृवाच्ये कर्णः च कर्मवाच्ये वदति। वाच्यनुसारं रिक्तस्थाननि पूरयत।** 3

क) शूक्रः – कर्ण! ii) __________महत्तरां भिक्षां याचे।
ख) कर्णः – ii) __________कर्णेन नमस्क्रियते।
ग) शक्रः – (आत्मगतं) किम् iii) __________वदानि ?

7. **वाष्पयाने यात्रिणौ वार्तालापं कुरुतः। प्रथमः कर्तृवाच्ये द्वितीयः च कर्मवाच्ये वदति। वाचयनुसारं रिक्तस्थानानि पूरयत।** 3

क) प्रथमः – भवान् कुत्र i) __________ ?
ख) द्वितीयः – मया तु इन्द्रप्रस्थनगरं ii) __________भवता च।
ग) प्रथमः – iii) __________तु कार्यवशात् सोनीपतनगरं गच्छामि।

8. **द्वे मित्रे दूरभाषे वार्तालापं कुरुतः। निरुपमा कर्तृवाच्ये वदति, विनीता च कर्मवाच्ये वदति। वाच्यनुसारं रिक्तस्थाननि पूरयत।** 3

निरुपमा – विनीते! अधुना किं करोषि
विनीता – i) __________नवीनं पुस्तकं मणिका पठ्यते।
निरुपमा – कीदृशः संयोगः अहम् अपि ii) __________एव पठितुम् उपविशामि। कशिचद् ध्वनिः आगच्छति। कं कार्यक्रमं दूरदर्शने iii) __________?

## समय लेखनम्

अधोलिखितवाक्येषु अङ्कानं स्थाने समयसूचकसंस्कृतसंख्यापदानि लिखत।

1. **मैट्रोरेलयानस्य –प्रस्थान–समय सारिणी–** 2

मैट्रोरेलयानम्
क) __________(10:00) वादने शाहदरा मैट्रोरेल स्थानके तिष्ठति। एतत् –
ख) __________(10:15) वादने राजीव चौकम् आगच्छति। ततः
ग) __________(10:30) वादने कश्मीरी द्वारम् आगच्छति। ततश्च
घ) __________(11:45) वादने द्वारकारेलस्थानके आगच्छति।

2. **अधः क्रीड़ास्थलस्य समयसारिणी लिखत।** 2

क) प्रातः 6:45 __________वादने प्रशिक्षकः तत्र आगच्छति।
ख) प्रातः 7:00 __________वादने क्रीडकाः आगच्छन्ति।
ग) प्रातः 7:30 __________वादने तैः पादकन्दुकस्य अभ्यास क्रियते।
घ) प्रातः 11:15 __________वादने सर्वे स्वगृहं गच्छन्ति।

3. **विद्यालयस्य समयसारिणीम् उचितसमयवाचकैः पदैः पूरयित्वा लिखत।** 2

क) प्रातः __________वादने प्रार्थना। (7:30 प्रातः)
ख) प्रातः __________अर्द्धावकाशः। (10:00 प्रातः)
ग) प्रातः __________वादने पञ्चमः कालांशः। (10:15 प्रातः)
घ) मध्याह्ने __________वादने पूर्णः अवकाशः। (12:45 मध्याह्ने)

4. **भवतः विद्यालयस्य वार्षिकोत्सवः अस्ति। तत्र कः कार्यक्रमः कतिवादने भविष्यति इति दृष्ट्वा रिक्तस्थाने लिखत।** 2

क) प्रातः (9:15) __________वादने सरस्वती वन्दना।
ख) प्रातः (9:30) __________वादने सांस्कृतिकः कार्यक्रमः।
ग) प्रातः (10:45) __________वादने प्रधानाचार्येण वार्षिकविवरणं प्रस्तूयते।
घ) प्रातः (11:00) __________वादने मुख्यातिथिना पुरस्कारवितरणम्।

5. **अधोलिखिते कार्यक्रमे अङ्कानां स्थाने समयं संस्कृतपदेषु लिखत।** 2
**दूरदर्शनस्य समाचारणां समयसारिणी।**

क) हिन्दी समाचाराः प्रातः (8:30) __________वादने प्रसार्यन्ते।
ख) संस्कृत समाचाराः प्रातः (10:15) __________वादने प्रसार्यन्ते।
ग) आंग्लसमाचाराः मध्याह्ने (2:00) __________वादने प्रसारिताः भवन्ति।

घ) उर्दूसमाचाराः मध्याह्ने (12:45) __________वादने प्रसार्यन्ते।

6. **अधोलिखितेषु वाक्येषु अंकानां स्थाने संस्कृतपदानि लिखत।** 2

क) सः (5:00) __________वादने उत्तिष्ठति।

ख) दन्त धावनं कृत्वा (5:30)__________ वादने भ्रमणाय गच्छति।

ग) तत्र (7:15) __________वादने पर्यन्तं व्यायामम् अपि करोति।

घ) गृहामागत्य (8:45) __________वादने कार्यालयं गच्छति।

## अव्ययपदानि

1. **अधोलिखितेषु मञ्जूषायाः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत।** 4

क) सः __________ वाराणसीं गमिष्यति।

ख) ग्रामात् __________ एका नदी प्रवहति।

ग) त्वं स्वनगरं __________ अगच्छः ?

घ) अहं __________ पुस्तकं पठामि।

**मञ्जूषा** – सम्प्रति, श्वः, कदा, बहिः।

2. **अधोलिखितेषु मञ्जूषायाः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत।** 4

क) सः __________वाराणर्सी गमष्यति।

ख) त्वम् __________समागतोऽसि।

ग) ग्रामात् __________एकं सुन्दम् उद्यानम् अस्ति।

घ) __________परोपकारः क्रियते तावत् शरीरस्य उपयोगः।

**मञ्जूषा** – बहिः, किमर्थम्, यावत्, कुतः।

3. **अधोलिखितेषु मञ्जूषायाः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत।** 4

क) यूयम् __________न भ्रमत।

ख) वृक्षेषु वानराः __________कूर्दन्ति।

ग) ते __________ लेखं लिखन्तु।

घ) __________जनकः नाम नृपोऽभवत्।

**मञ्जूषा** – पुरा, इदानीम्, एव, अत्र–तंत्र

4. **अधोलिखितेषु मञ्जूषायाः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत।** 4

क) वयं नेत्राभ्यां __________न पश्यामः।

ख) यथा पिता __________एव पुत्रः।

ग) अद्य __________ वृष्टिर्भविष्यति।

घ) शिशुः __________ विलपति।

**मञ्जूषा** – उच्चैः, नूनं, विना, तथा

5. **अधोलिखितेषु मञ्जूषायाः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत।** 4

क) सः __________ चौर अस्ति।

ख) मृगाः __________ धावन्ति।

ग) धनं __________ सुखं नास्ति।

घ) रावणः __________ दुर्योधनः अपि दुष्टः आसीत्।

**मञ्जूषा** – विना, इव, एव, इतस्ततः

6. **अधोलिखितेषु मञ्जूषायाः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत।** 4

क) __________ अहं संस्कृतस्य परीक्षां ददामि।

ख) विद्यां __________ जीवनं नरकम्।

ग) शिशुः __________ भ्रमति।

घ) __________ राजा दशरथः आसीत्।

**मञ्जूषा** – विना, इतस्ततः, पुरा, अधुना

## अशुद्धि संशोधन

रेखाङ्कितपदमानां स्थाने शुद्धं विकल्पं चित्वा वाक्यानि पुनः लिखत।

1. उद्याने <u>एकः</u> वृक्षाः सन्ति। 1

क) अनेकः   ख) अनेके   ग) अनेकानि   घ) अनेका

2. एकः चन्द्रः तमः <u>हन्मि</u>। 1

क) हन्ति   ख) हंसि   ग) हतः   घ) हनति

3. मम मातुः नामः श्रीमति श्यामा अस्ति। 1

क) नामम्   ख) नाम्   ग) नामन्   घ) नाम

4. अहं श्वः मित्रगृहं <u>अगच्छम्।</u> 1

क) गच्छामि ख) गच्छानि ग) गमिष्यामि घ) गमिष्यति

5. सरोवरे कमलाः विकसन्ति। 1

क) कमलः ख) कमलम् ग) कमलौ घ) कमलानि

6. अत्र मृगौ चरन्ति। 1

क) मृगः ख) मृगाः ग) मृगरन् घ) मृगैः

7. अहम् दुग्धं पिबसि। 1

क) वयम् ख) आवाम् ग) त्वम् घ) युवाम्

8. ह्यः होली पर्व अस्ति। 1

क) आसीत् ख) सन्ति ग) अस्तृ घ) आसन्

9. सुन्दरं पुष्पाणि मह्यं रोचन्ते। 1

क) सुन्दरम् ख) सुन्दराणि ग) सुन्दरः घ) सुन्दरे

10. वयं सत्यम् वदेत्। 1

क) वदति ख) वदामि ग) वदेम घ) वदामः

11. मया स मम मित्रेन अपि गमिष्यन्ति। 1

क) मित्रम् ख) मित्रे ग) मित्राणि घ) मित्रौ

12. ह्यः वयम् कोलकाता नगरं गमिष्यामः। 1

क) कदा ख) श्वः ग) यदि घ) किम्

13. अहमेव तव मित्रम् अस्ति। 1

क) सन्ति ख) असि ग) एधि घ) अस्मि

14. मम तु मित्राः सन्ति। 1

क) मित्रम् ख) मित्रानि ग) मित्राणि घ) मित्रैः

15. किं त्वम् श्वः चेन्नईनगरतः आगच्छः। 1

क) ऽः ख) आगमिष्यति ग) आगमिष्यसि घ) आगमिष्यामि

16. उद्याने सुन्दराणि मनोहराणि पुष्पम् सन्ति। 1

क) पुष्पाः ख) पुष्पाणि ग) पुष्पेभ्यः घ) पुष्पानि

17. एषः बालकः पत्रं लिखन्ति। 1

क) लिखितः ख) लिखति ग) लिखसि घ) लिखथः

18. गंगा पवित्रं नदी अस्ति। 1

क) पवित्रा ख) पवित्रः ग) पवित्राः घ) पवित्रम्

19. यूयम पाठं पठामः।। 1

क) पठन्ति ख) पठथ ग) पठथः घ) पठावः

20. अहम् श्वः भ्रमणाय गच्छामि। 1

क) अगच्छम् ख) गमिष्यामि ग) गच्छानि घ) गच्छाम

21. इमानि वस्त्राणि जनकस्य अस्ति। 1

क) असि ख) सन्ति ग) स्तः घ) आसीत्

22. पुरा आतङ्.कवादः अस्माकं देशे न भविष्यति। 1

क) भवति ख) आसीत् ग) भवन्ति घ) आसन्

23. सः अपि जलं पास्यसि। 1

क) पास्यन्ति ख) पास्यामि ग) पास्यतः घ) पास्यति

24. वृक्षे फलाः सन्ति। 1

क) फलम् ख) फलानि ग) फलेभ्यः घ) फलानाम्

25. सुदामा तत्र बहूनि भवाना दृष्ट्वा चकितः जातः। 1

क) भवने ख) भवनम् ग) भवनानि घ) भवनः

## पाठ – 1 वाङ्.मयं तपः

1. अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति!
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्।।

**I. एकपदेन उत्तरत।** 2

क) सरस्वत्याः कोशः कथं वर्धते ?

ख) सरस्वत्याः कोशः कीदृशः वर्तते ?

**II. पूर्णवाक्येन उत्तरत।** 2

क) विद्यायाः सञ्चयात् किम् भवति ?

**III. भाषिककार्यम्।** 2

क) अस्मिन् श्लोके 'अस्ति' इत्यर्थे किं पद प्रयुक्तम् अस्ति ?

i) आयति ii) अयम् iii) विद्यते iv) अपि

ख) 'अपूर्वः' इति विशेषणपदस्प विशेष्यपदं किम् ?

i) भारती ii) कोशः iii) तव iv) सञ्चात्

2. न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया।
प्रह्लादयति च पुरुषं यथा मधुरभाषिणी वाणी।।

**I. एकपदेन उत्तरत।** 2

क) छाया कीदृशी भवति ?

ख) मधुरभाषिणी वाणी कम् आह्लादयति ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) कीदृशी वाणी पुरुषं प्रह्लादायति ?

ख) कीदृशं जलं पुरुषं प्रसन्नं करोति ?

**III. भाषिककार्यम्।** 4

क) 'जलम्' इत्यर्थे अस्मिन् श्लाके किं पदं प्रयुक्तम् ?

i) सलिलम् ii) शीतलम् iii) चन्दनम् iv) पुरुषम्

ख) 'श्लोकात् उचितपदं चित्वा रिक्तस्थानपूर्ति कुरुत। चन्दनरसः अपि तथा प्रसन्नतादायकः न भवति ... ..................... मधुरा वाणी।

i) यथा ii) च iii) न iv) तथा

ग) 'शीतला' इति विशेषणपदस्य विशेष्यपदं किम् ?

i) छाया ii) वाणी iii) मधुरभाषिणी iv) सलिलम्

घ) 'उष्णा' इत्यस्य पदस्य कः विपर्ययः श्लोके आगतः ?

i) शीतल ii) छाया iii) शीतला iv) सलिलम्

3. आचार्यात्पादमादते पादं शिष्यः स्वमेधया।
कालेन पादमादत्ते पादं सव्रह्मचारिभिः।।

**I. एकपदेन उत्तरत।** 2

क) शिष्यः अन्ते कैः शिक्षायाः पादं ग्रहणति ?

ख) शिष्यः कुतः तृतीये क्रमे शिक्षाम् आदत्ते ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) शिष्यः कुतः शिक्षायाः प्रथमं पादम् आदत्ते ?

ख) कः स्वमेध्या ज्ञानं ग्रहणति ?

**III. भाषिककार्यम्।**

क) 'पादम् पदस्य अर्थः कः अस्ति ? 4

i) चरण ii) अंशम् iii) चतुर्थाशम् iv) पादः

ख) 'स्वमित्रैः' इति पदस्य अर्थे अत्र यलाके किं पदं प्रयूक्तम् ?

i) स्वमेधया ii) कालेन iii) आचार्यात् iv) सब्रह्यचारिभिः

ग) 'आदते' इति क्रियापदस्य कर्तृपदं किम् ?

i) गुरुः ii) शिष्यः iii) पादम् iv) मेधयाः

घ) श्लोके 'गुरु' पदस्य किं विपरीतपदम् अत्र प्रयुक्तमसित ?

i) मेध ii) पादम् iii) शिष्यः iv) आचार्यः

**निम्नलिखितश्लोकानाम् अन्वये उचितै पदेः रिक्तस्थानपूर्तिः कर्तव्या।**

क) अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति! 4
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्।।

**अन्वयः** – भारति! तव अयं i)_______कोऽपि ii) _________विद्यते। (यः) व्ययतः iii) ______आयाति iv) _________च क्षयम् आयाति।

**मञ्जूषा** – अपूर्वः, सञ्चयात्, बृद्धिम्, कोशः

ख) अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् 4
स्वाध्यायाभ्यसनं चैव वाड्.मयं तप उच्यते।।

**अन्वयः** – यत वाक्यम् i)_______सत्यं ii) _________(तथा) स्वाध्यायाभ्यसनं iii) ______एव वाड्.मयं iv) _________ उच्यते।

**मञ्जूषा** – तपः, अनुद्वेगकरम्, च, प्रियहितम्

**रेखाड्.कितानां पदानां स्थाने विकल्भेयः उचितं प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत।** 5

क) मधुरभाषिणी वाणी <u>पुरुषं</u> प्रसन्नं करोति।

i) कः ii) किम् iii) कम् iv) काम्

ख) <u>शिष्याः</u> आचार्यात् पादम् आदत्ते।

i) कः ii) का iii) काः iv) काम्

ग) तत्वज्ञानम् धीगुणः भवति।

i) किम् ii) कम् iii) काम् iv) कः

घ) सब्रह्मचारिभिः शिष्यः पादम् आदत्ते।

i) काभिः ii) कैः iii) के iv) केन

ड़) भारत्याः कोषः अपूर्वः अस्ति।

i) कः ii) कुत्र iii) कदा iv) कीदृशः

## पाठ – 2 आज्ञा गुरुणां हि अविचारिणीया

1. कस्मिंश्चित् नगरे चन्दो नाम भूपतिः प्रतिवसति म। तस्य पुत्राः वानराक्रीडारताः वानरयूथं नित्यमेव विविधैः भोज्यपदार्थैः पुष्टिं नयन्ति स्म। तस्मिन् राजगृहे बालवाहन योग्यं मेषयूथम् आसीत्। तेषां मेषाणां मध्ये एको मेषः जिह्वालोलुपतया अहिर्निशं महानसं प्रविश्य यत् पश्यति तद् भक्षयति। ते च सूपकाराः यत्किञ्चित् काष्ठं, मृण्मयं भाजनं, कांस्यताम्रपात्रं वा पश्यन्ति तेन आशु ताडयन्ति स्म।

**I. एकपदेन उत्तरत।** 2

क) नृपस्य किं नाम आसीत्

ख) के वानरैः सह क्रीडन्ति स्म ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) मेषः कुत्र प्रविश्य यत् पश्यति तद् भक्षयति ?

ख) सूपकाराः मेषं कैः ताडयनित स्म ?

**III. भाषिककार्यम्।** 4

क) 'तस्या पुत्रा' अत्र 'तस्य' पदं कस्मै प्रयुक्तम् ?

i) नृपाय ii) वानराय iii) मेषाय iv) वैधाय

ख) 'प्रवेश कृत्वा' इत्यर्थे गद्यांशे किं पदं प्रयुक्तम् ?

i) प्रवेश्य ii) प्रविश्य iii) प्रवेश्य iv) प्रविशाय

ग) 'विविधैः भोज्यपदार्थैः' अत्र विशेषणपदं किम् ?

i) पदार्थैः ii) भोज्यपदार्थैः iii) भोज्य iv) विविधैः

घ) अनुच्छेदे 'चिरम्' इति पदस्य कः विपर्ययः आगतः ?

i) शीघ्रम ii) पश्चात् iii) पूर्वम् iv) आशु

2. मेषस्य सूपकाराणां च कलहम् अवेक्ष्य नीतिविदाम् अग्रणीः वानरयूथपतिः अचिन्तयत् – 'एतेषां कलहो न वानराणां हिताय।' एवं विचार्य स यूथपः सर्वान् कपीन् आहूय रहसि अवदत् – सूपकाराणां मेषेण सह एषः कलहः नूनं भवतां विनाशकारणं भविष्यति। उक्तं हि –

**तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः।**
**तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्।।**

**I. एकपदेन उत्तरत।** 2

क) मेषस्य सूपकाराणां च कलहं केषां हिताय न आसीत् ?

ख) यूथपतिः कान् आहूय उपदेशम् अयच्छत् ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) कीदृशं गृहं दूरतः एव त्यक्तव्यम् ?

ख) वानरयूथपतिः केषाम् अग्रेणीः आसीत् ?

**III. भाषिककार्यम्।** 4

क) 'दृष्टवा' इति स्थाने कि पदम् अत्र प्रयुक्तम् ?

i) अवेक्ष्य ii) वीक्ष्य iii) दूरत: iv) विचार्य

ख) 'भवताम्' इति सर्वनामपदं केभ्यः प्रयुक्तम् ?

i) मेषेभ्यः ii) अश्वेभ्यः iii) कपिभ्यः iv) वैद्येभ्यः

ग) 'अकारणः' इति पदं कस्य पदस्य विशेषणम् ?

i) तस्मात् ii) कलहः iii) दूरतः iv) यूथपः

घ) 'उष्णा' इत्यस्य पदस्य कः विपर्ययः श्लोके आगतः ?

i) यूथपः ii) कपिः iii) वानरः iv) मेषः

3. अथ अन्यस्मिन् अहनि मेषो यावात् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताड़ितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः। ज्वालमालाकुलाः अश्वाः प्राणत्राणाय इतस्ततः अधावन्। तेषु केचिद् दग्धाः, केचिद अर्धगदग्धाः, केचन च पञ्चत्वं गताः।

**I. एकपदेन उत्तरत।** 2

क) वह्निना जाज्वल्यमानशरीरः मेषः कुत्र प्रविशति ?

खं) अश्वाः प्राणात्राणाय कुत्र अधावन् ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) यदा मेषः क्षितौ अलुठत् तदा किम् अभवत् ?

ख) मेषः केन अर्धज्वलितकाष्ठेन ताडितः ?

**III. भाषिककार्यम्।** 2

क) 'दिने' अस्य पर्यायवाचिपदं गद्यांशात् चिनुत।

i) अन्यस्मिन् ii) अहनि iii) रात्रौ iv) दिवसे

ख) 'तेषु केचिद् दग्धाः।' अत्र क्रियापदं किम् ?

i) केचिद् ii) तेषु iii) केचन iv) दग्धाः

ग) 'केचन' पञ्चत्वं गताः।' अत्र कर्तृपदं किम् ?

i) केचन ii) पञ्चत्वम् iii) दग्धाः iv) गताः

घ) 'तस्य भूमौ प्रलुठतः' अत्र 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

i) अश्वाय ii) नृपाय iii) मेषाय iv) वैद्याय

4. कसिमंश्चित् नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म। तस्य पुत्राः वानरक्रीडारताः वानरयूथं नित्यमेव विविधैः भोज्यपदार्थैः पुष्टिं नयन्ति स्म। तस्मिन् राजगृहे बालवाहनयोग्यं मेषयूथम् आसीत्। तेषां मेषाणां मध्ये एको मेषः जिह्वालोलुपतया अहर्निशं महानसं प्रविश्य यत् पश्यति तद् भक्षयति।

**I. एकपदेन उत्तरत।** 2

क) नगरे किं नाम भूपतिः प्रतिवसति स्म ?

ख) राजगृहे कीदृशं मेषयूथम् आसीत् ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) मेषः कुत्र प्रविश्य यत् पश्यति तद् भक्षयति ?

**III. भाषिककार्यम्।** 2

क) 'तस्य पुत्राः' अत्र 'तस्य' सर्वनामपदं कस्मै प्रयुक्तम् ?

i) चन्द्राय ii) मेषाय iii) वानराय iv) पदार्थाय

ख) 'पाकशालाम्' इति पदस्य पर्यायपदं गद्यांशे किम् प्रयुक्तम् ?

i) मेषः ii) वानरम् iii) भक्षयति iv) महानसम्

**निम्नलिखितश्लोकानाम् अन्वयं समुचितपदैः पूरयत।** 4

क) तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः।
तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्।।

**अन्वयः** – तसमात् यत्र i)_______नित्यम् अकारणः ii) _________स्यात्। जीवितं iii) ______(नरः) iv) _________दूरतः परिवर्जयेत्।

**मञ्जूषा** – गृहे, वाञ्छन्, तद्गृहम्, कलह

ख) कपीनां मेदसा दोषो वह्निदाहसमुद्भवः। 4
अश्वानां नाशमभ्येति तमः सूर्योदये यथा।।

**अन्वयः** – अश्वानां वह्निदाह i)_______दोषः कपीनां ii) _________(तथैव) iii) ______अभ्येति यथा iv) _________ तमः (नाशमभ्येति)।

**मञ्जूषा** – मेदसा, समुद्भवः, सूर्यादये, नाशम्

ग) मित्ररुपाः हि रिपवः सम्भाष्यन्ते विचक्षणैः। 4
ये हितं वाक्यमुतसृज्य विपरीतोपसेविनः।।

**अन्वयः** – ये हितं i)_______उत्सृज्य विपरीत ii) _________(भवन्त)। (ते) iii) ______मित्ररुपाः हि iv) _________सम्भाष्यन्ते।

**मञ्जूषा** – रिपवः, वाक्यम्, विचक्षणैः, उपसेविनः

## पाठ – 3 किं किम् उपादेयम्

1. कस्य वशे प्राणिगणः ? सत्यप्रियभाषिणो विनीतस्‍
क्व सथातव्यम् ? न्याय्ये पथि दृष्टादृष्टलाभाढ्ये।। य।

**I. एकपदेन उत्तरत।** 2

क) कस्मिन् पथि स्थातव्यम् ?

ख) कीदृशे न्यायमार्गे चलितव्यम् ?

**II. पूर्णवाक्येन उत्तरत।** 2

क) प्रणिगणः कस्य वशे तिष्ठति ?

**III. निर्देशानुसाराम् शुद्धम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वाः लिखत।** 2

क) 'मार्गे' इति अर्थे अत्र किं पदं प्रयुक्तम् ?

i) पथि ii) वशे iii) लाभाढ्ये iv) क्व

ख) 'उद्धतस्य' इत्यस्य विलोमपदम् अत्र किम् ?

i) स्य ii) सत्यप्रियभाषिणः iii) विनीतस्य iv) न्याय्ये

2. कोऽनर्थफलः ? मानः, का सुखदा ? साधुजनमैत्री।
सर्वव्यसनविनाशे कः दक्षः ? सर्वथा त्यागी।।

**I. एकपदेन उत्तरत।** 2

क) कः सर्वव्यसनविनाशे दक्षः ?

ख) का सुखदा भवति ?

**II. पूर्णवाक्येन उत्तरत।** 2

क) मानस्य फलं कीदृशम् भवति ?

**III. भाषिककार्यम्।** 2

क) 'मित्रता' अस्य कः पर्यायः ?

i) सुखदा ii) मैत्री iii) सर्वथा iv) त्यागी

ख) 'दुःखदा' अस्य कः विलोमः ?

i) सुखदा ii) सर्वथा iii) मैत्री iv) त्यागी

**निम्नलिखितश्लोकानाम् अन्वयं समुचितपदैः पूरयत।** 4

क) भगवन्किमुपादेयम् ? गुरुवचनम्, हेयमपि च किम् ? अकार्यम्।
को गुरुः ? अधिगततत्त्वः शिष्यहितायोद्यतः सततम्।।

**अन्वयः** – भगवान्! i)_______किम् ? गृरुवचनम्। अपि च ii) _________किम् ? अकार्यम्। गुरुः कः ? (यः) iii) ______शिष्यहिताय iv) _________अधिगततत्त्वः च (भवति)।

**मञ्जूषा** – हेयम्, उपादेयम्, उद्यतः, सततम्

ख) नलिनीदलगतजलवत्तरलं किम् ? यौवनं धनृ चायुः। 4
कथय पुनः के शशिनः किरणसमाः ? सज्जना एव।।

**अन्वयः** – i)_______गत जलवत् तरलं किम् ? यौवनं, धनम् ii) _________च। पुनः कथंय iii) ______किरणसमाः के iv) _________ एव (भवन्ति)।

**मञ्जूषा** – आयुः, सज्जनाः, नलिनीदल, शशिनः

ग) कस्य वशे प्राणिगणः ? सत्यप्रियभाषिणो विनीतस्य 4
क्व स्थातव्यम् ? न्याय्ये पथि दृष्टादृष्टलाभाढ्ये।।

**अन्वयः** – कस्य i)_______प्राणिगणः ? सत्यप्रिय ii) _________विनीतस्य। क्व iii) ______दृष्टादृष्ट iv) _________न्याय्ये पथि।

**मञ्जूषा** – स्थातव्य्, वशे, लाभाढ्ये, भाषिणः

**रेखाङ्कितपदानां स्थाने विकल्पेभ्यः उचितं प्रश्नवाचकं पदं प्रयुज्य प्रश्ननिर्माणं कुरुत।** 4

क) असिमन् लोके यः सत्यवादी प्रियवादी च तस्य वशे <u>सर्वे जनाः।</u>

i) का ii) के iii) काः iv) कः

ख) <u>अवसरे</u> दत्तम एव धनम् अमूल्यम् ?

i) कासाम् ii) केषाम् iii) के iv) कदा

ग) जन्तोः मूढता <u>निद्रा</u> भवति।

i) काम् ii) कस्य iii) का iv) कीदृशी

घ) <u>प्राण्निां</u> मूढता निद्रा कथिता।

i) केषाम् ii) केषु iii) केभ्यः iv) कान्

**प्रसङ्गानुसारम् रेखाङ्कितपदानां अर्थं विकल्पेभ्यः चित्वा लिखत।** 4

क) कि किम् <u>उपादेयम्</u> ?

i) दानयोग्यम् ii) अनुकरणीयम् iii) धावनीयम् iv) करणीयम्

ख) किम् जीवितम् ? <u>अनवद्यम्।</u>

i) विद्यायुक्तम् ii) अविद्यामानम् iii) विद्यारहितम् iv) अनिन्दनीयम्

ग) गुरुवचनम् हि <u>उपादेयम्।</u>

i) त्याज्यम् ii) परित्यागः iii) देयम् iv) ग्रहणीयम्

घ) किं जीवितम् ? <u>अनवद्यम्।</u>

i) अपयशः ii) वचनीयता iii) अनिन्द्याम् iv) वदनीयम्

## पाठ – 4 नास्ति त्यागसमम् सुखम्

अथा एकदा भगवान् बोधिसत्त्वः बहुजन्मर्जितपुण्यफलैः शिवानां राजा बभूव। स बाल्यात् एव वृद्धोपसेवीख विनयशीलः शास्त्रपारङ् च आसीत्। जनकलयाणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म। कारुण्य–औदार्यादिसद्गुणेपेतः स नगरस्य समन्ततः धन–धान्यसमृद्धाः दानशालाः आकरयत्। तत्र अर्थिनां समूहः अन्न–पान–वसन–रजत–सुवर्णादिकानि अभीष्टानि व्स्तूनि प्राप्य सन्तुष्टः अभवत्। राज्ञः दानशीलतम् आकर्ण्य

देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म।

**I. एकपदेन उत्तरत।** 2

क) कस्य दानशीलतां श्रुत्वा जनाः शिविनां राज्ञः देशं गच्छन्ति स्म ?

ख) राजा काः पुत्रवत् पालयति स्म ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) बोधिसत्त्वः बाल्यकालात् एव कीदृशः आसीत् ?

ख) राजा कस्य समन्ततः दानशालाः अकारयत् ?

**III. भाषिककार्यम्।** 4

क) अस्मिन् अनुच्छेदे 'लब्ध्वा' इत्यर्थे किं पदे प्रयुक्तम् ?

i) अर्थिनाम् ii) प्राप्य iii) आकर्ण्य iv) आयान्ति

ख) 'अभीष्टानि वस्तूनि' अनयोः पदयोः विशेषणपदम् किमस्ति ?

i) अभीष्टानि ii) वस्तूनि iii) वस्तुजातम् iv) अभीष्टम्

ग) 'गच्छन्ति' इति क्रियापदस्य क विपर्ययः अत्र प्रयुक्तः ?

i) आसीत् ii) अभवत् iii) बभूव iv) आयान्ति

घ) 'शिवीनां राजा बभूव।' अत्र कर्तृपदं किम् ?

i) बभूव ii) शिवीनाम् iii) राजा iv) भगवान्

राज्ञि एवं विचारयति सति तस्य दानशीलतां परिक्षतुं देवाधिपतिः शक्रः नेत्रहीनयाचकस्य रुपं धारयित्वा तत्पुरतः अवदत्–हे राजन्! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि। देव! रवि–शशि–तारा–मण्डलभूषितं जगत् एतत् कथमिव पश्येयम् चक्षुर्हीनः।

**I. एकपदेन उत्तरत।** 2

क) कस्य दानवीरताम् आकर्ण्य शक्रः आगतः ?

ख) शक्रः कीदृशो भूत्वा तत्र आगतः आसीत् ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) नृपस्य दानशीलतां परीक्षितुं कः आगतः आसीत् ?

ख) जगत् कीदृशम् अस्ति ?

**III. भाषिककार्यम्।** 4

क) 'रवि–शशि–तारा–मण्डलभूषितम' इत्यस्य विशेष्यः कः ?

i) जगत् ii) एतत् iii) कथम् iv) कथमिव

ख) 'श्रुत्वा' इति पदस्य अर्थे किं पदम् अनुच्छेदे आगतम् ?

i) परीक्षितुम् ii) पश्येयम् iii) चक्षुर्हीनः iv) आकर्ण्य

ग) अनुच्छेदे 'अन्धः' इत्यस्य पदस्य कः पर्यायः प्रयुक्तः ?

i) शक्र ii) नृपः iii) चक्षुर्हीन iv) पुरतः

घ) 'अवदत्' इति क्रियापदस्य कर्तृपदं किम् ?

i) शक्रः ii) देवाधिपतिः iii) भवतः iv) तत्पुरतः

एवम् उक्तेन राज्ञा नेत्रार्थ प्रार्थिते सति शक्रस्य प्रभावेण आत्मनः सत्यपुण्सबलेन च तसय प्रथमम् एकं चक्षुः प्रतिष्ठिम् अभवत् ततः द्वितीयमपि। भूयः प्रीतः शक्रः वरम् अददात् – शतयोजनपर्यन्तं शैलानां पारं च द्रष्टुं समर्थः भव इति। इति उक्त शक्रः तत्रैव अन्तर्हितः अभवत्।

**I. एकपदेन उत्तरत।** 2

क) शक्रस्य प्रभावेण प्रथमम् एकं चक्षुः किम् अभवत् ?

ख) नृपस्य नेत्र कति दूरं यावत् द्रष्टुम् समर्थम् अभवत् ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) प्रीतः शक्रः नृपाय किं वरम् अददात् ?

ख) कः कस्मै च नैत्रार्थ प्रार्थयत् ?

**III. भाषिककार्यम्।** 4

क) 'प्रीतः' इति शब्दः कस्य विशेषणरुपे अत्र प्रयुक्तः ?

i) प्रीतस्य ii) शक्रस्य iii) वरस्य iv) नृपस्य

ख) 'शापम्' इति पदस्य कः विपर्ययः अत्र प्रयुक्तः ?

i) दानम् ii) वरम् iii) चक्षुः iv) नेत्रम्

ग) 'केचन' पञ्चत्वं गताः।' अत्र कर्तृपदं किम् ?

i) भूयः ii) आत्मनः iii) समर्थः iv) चक्षुः

घ) 'अनुच्छेद' 'अभवत्' इति क्रियायाः कर्तृपदं किम् ?

i) प्रथमम् ii) एकम् iii) चक्षुः iv) प्रतिष्ठितम्

धनस्य निःसारलघोः स सारो यद् दीयते लोकहितोन्मुखेन।
निधानतां याति हि दीयमानम्, अदीयमानं निधनैकपिष्ठम्।।

**I. एकपदेन उत्तरत।** 2

क) सारः कस्य भवति ?

ख) कीदृशं धनं निधानतां याति ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) धनं कीदृशं भवति ?

ख) केन कार्येण धनस्य सारो भवति ?

**III. भाषिककार्यम्।** 4

क) श्लोके 'दीयमानम्' पदस्य कः विपर्ययः आगतः ?

i) अदीयमानम् ii) निधनम् iii) एकनिष्ठम् iv) सारः

ख) 'दीयते' इति क्रियायाः कर्मपदं किम् ?

i) सः ii) सारः iii) यद् iv) धनस्य

ग) श्लोकात् एकम् अव्ययं चित्वा लिखत।

i) सारः ii) सः iii) यति iv) हि

घ) 'निःसारलघोः' इति विशेषणस्य विशेष्यपदं किम् ?

i) धनस्य ii) सारः iii) सः iv) दीयते

**निम्नलिखितश्लोकानाम् अन्वयं समुचितपदैः पूरयत।** 4

क) शक्रोऽहमस्मि देवेन्द्रस्त्वत्समीपमुपागतः।
वरं वृणीष्व राजर्षे! यदिच्छसि तदुच्यताम्।।

**अन्वयः** – राजर्षे! अहं i)_______शक्रः त्वत् समीपम् ii) _________अस्मि iii) ______वृणीष्व यद् iv) _________तत् उच्यताम्

ख) दास्यामीति प्रतिज्ञाय योऽन्यथा कुरुते मनः।
कार्पण्यनिश्चितमतेः कः स्यात् पापतरस्ततः।।

**अन्वयः** – i)_______इति प्रतिज्ञाय ii) _________मनः अन्यथा कुरुते ततः कार्पण्य– iii) ______ iv) _________ कः स्यात्।

**निम्नलिखितेषु वाक्येषु रेखांड्.कितपदानि आधृत्य विकल्भेयः उचितं पदं चित्वा प्रश्ननिर्माणं कुरुत।** 4

क) राजा पुत्रवत् <u>प्रजाः</u> पालयति स्म।

i) कः ii) काः iii) कस्याः iv) कस्याम्

ख) राजा शिविः <u>याचभेयः</u> दानं ददति स्म।

i) काभ्यः ii) केः iii) केभ्यः iv) कान्

ग) अहं <u>भवते</u> चक्षुर्द्वयमेव प्रयच्छामि।

i) कः ii) के iii) कस्मै iv) कस्यै

घ) <u>राज्ञः</u> नेत्रदानार्थं निश्चयं ज्ञात्वा अमात्याः विषण्णाः अभवन्।

i) कः ii) कस्य iii) केन iv) कस्मै

**प्रसंड्.गानुसारं रेखांड्.कितपदानाम् अर्थं विकलेभ्यः चित्वा लिखत।** 4

क) <u>आर्त्तानां</u> दानाय दृढनिश्चयः राजा तस्मै चक्षुर्द्वयं समर्पितवान्।

i) दुःखयुक्तानाम् ii) सुखयुक्तानाम् iii) धनयुक्तानाम् iv) बलयुक्तानाम्

ख) शक्रः तस्य त्यागवृत्तिम <u>प्रशंसन्</u> अवदत्।

i) निन्दन् ii) स्तुवन् iii) वदन् iv) कुर्वन्

ग) मम अर्थिनः सन्तोषं <u>भजन्ते</u>।

i) कुर्वन्ति ii) चलन्ति iii) प्राप्नुवन्ति iv) वर्दन्ति

घ) क्रमशः याचकानाम् संख्या <u>विरला</u> जाता।

i) न्यूना ii) अधिका iii) सरला iv) विशिष्टा

## पाठ – 5 अभ्यासवशगं मनः

शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्।
कामक्रोधभवं वेगं, स युक्तः स सुखी नरः।।

**I. एकपदेन उत्तरत।** 2

क) कः कामक्रोधोद्भवं वेगं सोढुं शक्नोति ?

ख) कः नरः सुखी ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) किं कृत्वा नरः सुखी भवति ?

ख) कुत्र जनः कामक्रोधद्भवं वेगं सोढुं शक्नोति ?

**III. भाषिककार्यम्।** 4

क) 'युक्तः' इति पदस्य अर्थः कः अस्ति ?

i) सहितः ii) योगी iii) योगः iv) युजितः

ख) 'पूर्वम्' इत्यर्थे श्लोके किं पदं प्रयुक्तम् ?

i) प्राक् ii) युक्तः iii) सुखी iv) वेगम्

ग) 'सुखी नरः' अनयोः पदायोः विशेषणपदं किम् ?

i) नरः ii) वेगम् iii) सुखी iv) युक्तः

घ) 'शक्नोति' इति क्रियापदस्य कर्तृपदं किम् ?

i) इह ii) वेगम् iii) यः iv) युक्तः

क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति।।

**I. एकपदेन उत्तरत।** 2

क) सम्मोहः कस्मात् भवति ?

ख) प्राणी कथं प्रणश्यति ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) बुद्धिनाशः कथं भवति ?

ख) सम्मोहात् किं भवति ?

**III. भाषिककार्यम्।** 4

क) 'बुद्धिनाशात् प्रणश्यति।' अत्र क्रियापदं किम् ?

i) बुद्धि ii) बुद्धिनाशात् iii) प्रणश्यति iv) नाशात्

ख) 'भवति' इत्यस्य क्रियापदस्य कर्तृपदं किम् ?

i) सम्मोहः ii) मोह iii) क्रोधः iv) क्रोधात्

ग) 'सम्मोहः' कर्तृपदस्य अर्थे श्लोके किं पदं प्रयुक्तम् ?

i) क्रोधः ii) भवति iii) क्रोधात् iv) क्रोधेन

घ) 'म्रियते' इति क्रियापदस्य अर्थे श्लोके किं पदं प्रयुक्तम् ?

i) भवति ii) प्रणश्यति iii) नश्यति iv) स्मृतिविभ्रमः

चञ्चलं हि मनः कृष्ण! प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।।

**I. एकपदेन उत्तरत।** 2

क) अस्मिन् श्लोके सम्बोधनपदं किम् ?

ख) चञ्चलं किम् अस्ति ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) मनः कीदृशम् अस्ति ?

ख) मनसः वशीकरणं केन समं दुष्करम् ?

**III. भाषिककार्यम्।** 4

क) 'प्रमथनशीलम् ' इति स्थाने किं पदम् अत्र प्रयुक्तम् ?

i) प्रमाथि ii) प्रमाथी iii) कृष्ण iv) चञ्चलम्

ख) 'बलवद्' इति कस्य विशेषणम् ?

i) दृढस्य ii) कृष्णस्य iii) मनसः iv) चञ्चलस्य

ग) 'सरलम्' इति अस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

i) कठिनम् ii) सुदुष्करम् iii) दुष्करम् iv) निग्राहम्

घ) 'मन्य' इति क्रियापदस्य कर्तृपदं किम् ?

i) अहम् ii) तस्य iii) तस्याहम् iv) निग्रहम्

काम एष क्रोध एष रजोगुणसमुद्भवः। 4
महाशनो महापाप्मा विद्ध्यनेमहि वैरिणम्।।

**अन्वयः** – रजोगुण i)______एषः कामः एषः ii) ________महाशनः iii) ______ इनम् इह iv) ______ विद्धि।

**मञ्जूषा** – वैरिणम्, क्रोध, समुद्भवः, महापाम्पा

ध्यायतः विषयान् पुंसः सङ्गस्तेषूपजायते। 4
सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते।।

**अन्वयः** – i)______ध्यायतः पुंसः तेषु ii) _______उपाजयते। सङ्गात् iii) ______ सञ्जायते iv) ______ क्रोधः अभिजायते।

**मञ्जूषा** – कामात्, विषयान्, सङ्.गः, कामः

तस्मात्त्वमिन्द्रियाणयादौ नियम्य भरतर्षभ। 4

पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्।।

**अन्वयः** – भरतर्षभ! i)______त्वं हि ii) _______ इन्द्रियाणि नियम्य iii) ______ एनं पाप्मानं iv) _____।

**मञ्जूषा** – प्रजहि, ज्ञानविज्ञाननाशनम्, आदौ, तस्मात्

**रेखांकितपदानि आधृत्य विकल्पेभ्यः उचितं पदं चित्वा प्रश्ननिर्माणं कुरुत।** 3

क) 'यः क्रोधस्य वेगं जीवने सहते सः एव <u>सुखी</u>।

i) कः ii) कीदृशः iii) का iv) काः

ख) वार्ष्णेय! केन प्रयुक्तः अयं पूरुषः <u>पापं</u> चरति।

i) किम् ii) कम् iii) काम् iv) कान्

ग) <u>ज्ञानविज्ञाननाशम्</u> पाप्मानं प्रजहि।

i) शरीरम् ii) क्रोधम् iii) अर्जुनम् iv) बुद्धिम्

## पाठ – 6 साधुवृत्तिं समाचरेत्।

अथ ब्रजन्तौ तौ गर्तसंकुले मार्गे क्रीडतः कांश्चित् बालकान् प्रेक्ष्य अवदताम् – भो भो बालकाः! कथमत्र नतोन्न्ते विषमे मार्गे क्रीडथ ? यदिकशिचद् गर्ते तर्हि सः पतेत् तर्हि सः विकलाङ्.गो भूत्वा चिरं क्लेशम् अनुभवेत्। तच्छुत्वा तेषु कश्चित् उद्दण्डः बालकः: उवाच – अयि भो! यद्येव तर्हि कथं भवन्तौ सुपथं परित्यज्य अनेन कुपथेन गन्तुं प्रवृतौ ? अपि इदम् श्रेयस्करम् ?

**I. एकपदेन उत्तरत।** 2

क) बालकः कीदृशे मार्गे क्रीडन्ति स्म ?

ख) तौ केन गन्तुं प्रवृतौ ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) तौ बालकान् प्रेक्ष्य किम् अवदताम् ?

ख) कशिचद् गर्ते पतित्वाइ किम् अनुभवेत् ?

**III. भाषिककार्यम्।** 4

क) 'अवदताम्' इति क्रियायाः कर्तृपदं किम् ?

i) ब्रजन्ती ii) तौ iii) क्रीडत iv) बालकान्

ख) 'क्रीडतः बालकान् अनयोः पदयोः विशेषणं किम् ?

i) बालकान् ii) बालकाः iii) क्रीडन् iv) क्रीडतः

ग) अनुच्छेदे 'दृष्ट्वा' इति पदस्य पर्यायः कः ?

i) वीक्ष्य ii) प्रेक्ष्य iii) प्रईक्ष्य iv) ईक्षित्वा

घ) अत्र अनुच्छेदे 'सुखम्' इत्यस्य कः विपर्ययः आगतः ?

i) दुःखम् ii) कुपथम् iii) क्लेशम् iv) क्लेशः

एवं बहुविधम् उपदेशं श्रुत्वा शान्तचित्तः सः कस्यचित् कृषकस्य शस्यक्षेत्रे हलकार्यं कर्तुं प्रारभत श्रमेण च शनैः शनैः प्रभूतं धनम् अर्जितवान्।

**I. एकपदेन उत्तरत।** 2

क) प्रच्छन्नभाग्यः किम् अर्जितवान् ?

ख) सः कुत्र हलकार्यं कर्तुं प्रारभत ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) प्रच्छेन्नभाग्यः कथं प्रभूतं धनम् अर्जितवान् ?

ख) उपदेश श्रुत्वा सः किं कर्तुं प्रारभत ?

**III. भाषिककार्यम्।** 4

क) अनुच्छेदे 'उपदेशम्' इति विशेष्यपदस्य विशेषणं किम् ?

i) एवम् ii) बहुविधम् iii) हलकार्यम् iv) प्रभूतम्

ख) 'प्रारभत्' इति क्रियायाः कर्तृपदं किम् ?

i) सः ii) कृषकस्य iii) कस्यचित् iv) कर्तुम्

ग) 'शीघ्रम्' इत्यस्य पदस्य कः विपर्ययः अत्र प्रयूक्तः ?

i) प्रभूतम् ii) धनम् iii) शनैः iv) हल्कार्यम्

घ) 'सः कस्यचित्' अत्र 'सः' इति कर्तृपदस्य क्रियापदं किम् ?

i) प्रारभत ii) प्रभूतम् iii) कर्तुम् iv) अर्जितम्

पापिनाञ्च सदा दुःखं सुखं वे पुण्यकर्मणाम् ?

एवं स्थिरतरं ज्ञात्वा साधुवृत्तिं समाचरेत्।।

**I. एकपदेन उत्तरत।** 2

क) पापिनः किं लभन्ते ?
ख) पुण्यकर्मभिः च किं प्राप्यते ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) किं सिथरतरं ज्ञातव्यम् ?
ख) जनः कां समाचरेत् ?

**III. भाषिककार्यम्।** 4

क) श्लोकात् एकम् अव्ययं चित्वा लिखत।
i) सदा ii) सुखम् iii) दुःखम् iv) साधुवृत्तिम्

ख) 'सुखम् पदस्य कः विपर्ययः श्लोके प्रयुक्तः ?
i) वै ii) स्थिरतरम् iii) साधुवृत्तिम् iv) दुःखम्

ग) श्लोके क्रियापदं किम् ?
i) समाचरेत् ii) साधुवृत्तिम् iii) स्थिरतरम् iv) पापिनाञ्च

घ) 'सदाचारम्' इति पदस्य कः पर्यायः श्लोके लिखितः ?
i) स्थिरतरम् ii) साधुवृत्तिम् iii) सुखम् iv) दुःखम्

जलबिन्दुनिपातेन क्रमशः पूर्यते घटः। 4
स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च।।

**अन्वयः** – जलबिन्दुनिपातेन i)______क्रमशः पूर्यते। ii) _______विद्यानां धर्मस्य, iii) ______ च सः एव iv) ______ (भवति)।

**मञ्जूषा** – सर्व, हेतुः, धनस्य, घटः

पापिनाञ्च सदा दुःखं सुखं वै पुण्यकर्मणाम्। 4
एवं स्थिरतरं ज्ञात्वा साधुवृत्तिं समाचरेत्।।

**अन्वयः** – सदा पापिनां दुःखं i)______वै ii) _______ एवं स्थिरतरं iii) ______, iv) _____समाचरेत्।

**मञ्जूषा** – साधुवृत्तिम्, ज्ञात्वा, सुखम्, पुण्यकर्मणाम्

**रेखांकितपदानि आधृत्य विकल्पेभ्यः उचितं पदं चित्वा प्रश्ननिर्माणं कुरुत।** 4

क) तच्छ्रुत्वा परद्रव्ये अनासक्ता स न्यवेदयत्।
i) कस्मिन् ii) कुत्र iii) कति iv) के

ख) कर्मपुरनगरे एकः कुमारः आसीत्।
i) कस्य ii) कुत्र iii) किम् iv) कति

ग) कथं नतोन्नते मार्गे यूयं क्रीडथ ?
i) के ii) कस्मिन् iii) कीदृशः iv) कीदृशे

घ) कृषकस्य क्षेत्रे श्रमं कृत्वा सः धनन् अर्जितान्।
i) कः ii) कम् iii) केन iv) किम्

**निम्नलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।** 4

क) प्रच्छन्नभाग्यः स्वगृहं प्रतिनिवृतः।
ख) प्रच्छन्नभाग्यः स्वपत्नीम् अवदत्।
ग) विचित्रः स्वपनः मया दृष्टः।
घ) प्रच्छन्नभाग्यस्य गृहम् मणीनाम् आभया भासमानम् अभवत्।

## पाठ – 7 रमणीया हि सृष्टिः एषा

हंसः श्वेतः बकः श्वेतः, को भेदः बकहंसयोः।
नीरक्षीरविवेके तु हंसो हंसः बको बकः।।

**I. एकपदेन उत्तरत।** 2

क) बकः कीदृशोऽस्ति ?
ख) नीरक्षीरविवेकी कः मन्यते ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) कदा हंसो हंसः बकः च बकः भवति ?
ख) वर्णदृष्टया कयोः मध्ये भेदः न भवति ?

**III. भाषिककार्यम्।** 4

क) श्लोके 'जलम्' इत्यस्य पदस्य अर्थे कः शब्दः प्रयुक्तः ?
i) आपः ii) क्षीर iii) नीर iv) विवकेः

ख) 'श्वेतः' इति पदं कस्य विशेषणम् अस्ति ?
i) हंसस्य ii) बकस्य iii) उभयौः iv) कोऽपि न

ग) 'दुग्धम्' पदस्य कः पर्यायः अत्र आगतः ?

i) नीरम्  ii) क्षीरम्  iii) बकः  iv) हंसः

घ) 'अज्ञाने' इत्यस्य पदस्य कः विपर्ययः अत्र प्रयुक्तः ?

i) भेदः  ii) विवेक  iii) को  iv) श्वेतः

राजहंसः – अये! किन्नु खलु सरस्तीरे विहरति मयि केनापि कर्कशैः 'का–का' शब्दैः वातावरणम् आकुलीक्रियते ?

राजहंसी – भर्तः! काकात् अन्यः को भवितुमर्हति ? अस्य वर्णः अपि कृष्णः, कर्म अपि कृष्णम्। मेधयम् अमेध्यं सर्वमेव भक्षयति। कर्णकटुशब्दैः..........

काकः – (प्रवश्य, सक्रोधम्) आः किम् उक्तवती भवती ? यहि अहं कृष्णवर्णः तर्हि श्रीरामस्य वर्णः कीदृशः ? श्रीवासुदेवस्य वर्णः कीदृशः ? मुग्धे! अहं तु अतीव कर्तव्यपरायणः। प्रभाते 'का–का' ध्वनिना सुप्तान् प्रबोधयामि कर्मसु च विनियोजयामि।

राजहंस – हुँ! किमनेन ? एतत् कार्यं तु कुक्कुटोऽपि करोति।

**I. एकपदेन उत्तरत।** 2

क) अत्र कति पात्राणि वार्तालापं कुर्वन्ति ?

ख) कः कर्तव्यपरायणः अस्ति ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) काकस्य विषये राजहंसी किं कथयति ?

ख) प्रभाते कः कर्मसु विनियोजयति ?

**III. भाषिककार्यम्।** 4

क) 'प्रातःकाले' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?

i) प्रभाते  ii) कीदृशः  iii) भवते  iv) भवती

ख) अत्र के पदे परस्परं विलोमपदे स्तः ?

i) मेध्यम्–अमेध्यम्  ii) का–का  iii) वर्ण–कर्म  iv) प्रभाते–सायम्

ग) 'कर्मशील' इति पदस्य पर्यायपदम् अत्र किं प्रयुक्तम् ?

i) अतीव  ii) कर्तव्यः  iii) कर्तव्यपरायणः  iv) परायणः

घ) नाट्यांशे 'कृष्णम्' इति विशेषणस्य विशेष्यपदं किम् ?

i) वर्णः  ii) कर्म  iii) आचरणम्  iv) मुखम्

**निम्नश्लोकान् पठित्वा मञ्जूषायाः सहायतया च अन्वयपूर्तिः कुरुत।**

काकस्य गात्रं यदि काञ्चनस्य, 4<br>
मणिक्यात्नं यदि चञ्चुदेशे।<br>
एकैकपक्षे ग्रथितं मणीनां,<br>
तथापि काको न तु राजहंस।।

**अन्वयः** – यदि i)______गात्रम् काञ्चस्य (भवेत्) यदि (तस्य) ii) _______माणिक्यरत्नम् (भवेत्)। (यदि) iii) ______ पक्षे मणीनम् ग्रथितं (भवेत्) तथापि iv) ______ राजहंसः तु न (भविष्यति)।

**मञ्जूषा** – चञ्चुदेशे, एकैक, काकस्य, काकः

हंसः श्वेतः बकः श्वेतः, को भेदः बकहंसयोः।। 4<br>
नीरक्षीरविवेके तु हंसो हंसः बको बकः।।

**अन्वयः** – हंसः श्वेतः i)______(अपि) शवेतः बकहंसयोः कः ii) _______? नीरक्षीर iii) ______ तु हंसः हुसः iv) ______ बकः (भवति)।

**मञ्जूषा** – बकः, बकः, विवेके, भेदः

आयुषः क्षण्मेकोऽपि, न लभ्यः स्वर्णकोटिकैः। 4<br>
स चेन्निरर्थकं नीतः, का नु हानिस्ततोऽधिका।।

**अन्वयः** – आयुषः एकः i)______अपि स्वर्ण ii) _______ न लभ्यः। iii) ______ चेत् निरर्थकं नीतः ततः iv) _____नु हानिः का ?

**मञ्जूषा** – सः, कोटिकैः, अधिका, क्षणम्

अधुना रमणीया हि, सृष्टिरेषा जगत्पतेः। 4<br>
जीवाः सर्वेऽत्र मोदन्तां, भावयन्तः परस्परम्।

**अन्वयः** – एषाः जगत्पतेः i)_____हि अधुना ii) ____ । सर्वे iii) ____ अत्र परस्परं भावयन्तः iv) ____।

**मञ्जूषा** – रमणीया, मोदन्ताम्, सृष्टिः, जीवाः

**निम्नलिखितवाक्येषु रेखाङ्.कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।** 4

क) कलहेन समयं वृथा न वापयितव्यम्

ख) अहमेव सवेषां पक्षिणा माता।

ग) राजहंसः नीरक्षीरविवेकी इति मन्यते।

घ) मम पिच्छानाम् अपूर्व सौन्दर्यम्।

**विकल्भेयः उचितपदं चित्वा शब्दार्थमेलनं क्रियताम्।** 4

क) श्रुत्वा

i) आकर्ण्य ii) विपत् iii) भ्रमतः iv) प्रगल्भः

ख) जगत्पतेः

i) ईश्वरस्य ii) भवेयुः iii) आत्मश्लाघया iv) गृहीत्वा

ग) वाचालः

i) गृहीत्वा ii) प्रगल्भः iii) आत्मश्लाघया iv) भवेयुः

घ) धृत्वा

i) भवेयुः ii) गृहीत्वा iii) विपत् iv) मिथ्या

## पाठ – 8 तिरुक्कुरल सूक्ति सौरभम्

त्यक्तवा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।
परित्यज्य फलं पक्वं भुङ्.क्तेऽपक्वं विमूढधीः।।

**I. एकपदेन उत्तरत।** 2

क) विमूढधीः धर्मप्रदां वाचं त्यक्तवा कीदृशीम् अभ्युदीरयेत् ?

ख) विमूढधीः कीदृशं फलं परित्यजति

**II. पूर्णवाक्येन उत्तरत।** 4

क) कः विमूढधीः भवति ?

ख) कः धर्मप्रदां वाचं त्यजति ?

**III. भाषिककार्यम्।** 4

क) अत्र श्लोके 'परित्यजय' पदस्य कः पर्यायः प्रयुक्तः

i) अपरित्यज्य ii) त्यक्त्वा iii) पक्वम् iv) अभ्युदीरयेत्

ख) 'पक्वम्' इति पदस्य विपर्ययपदं किमत्र प्रयुक्तम् ?

i) अपक्वम् ii) धर्मप्रदाम् iii) वाचम् iv) फलम्

ग) श्लोके 'यो' (यः) इति कतृपदस्य क्रियापदं किम् ?

i) दीरयेत् ii) अभ्युदीरयेत् iii) परित्यज्य iv) भुङ्.क्ते

घ) 'फलं पक्वम्' अनयोः पदयोः विशेषणपदं किम् ?

i) पक्वम् ii) फलम् iii) फलपक्वम् iv) पक्वफलम्

यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णयः।
कर्तुं शक्यो भवेद्येन स विवक इतीरितः।।

**I. एकपदेन उत्तरत।** 2

क) जनः किं कर्तुं शक्यते ?

ख) जनैः केन तत्त्वार्थनिर्णयः कर्तुं शक्यते ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) विवकः कः भवित ?

ख) कः तत्त्वार्थनिर्णयं कर्तुं शक्नोति ?

**III. भाषिककार्यम्।** 4

क) श्लोकस्य 'प्रोक्तम्' इति क्रियायाः कर्तृपदं किम् ?

i) येन–केन ii) केनापि iii) तस्य iv) तत्त्वार्थनिर्णयः

ख) श्लोकात् एकम् अव्ययपदं चित्वा लिखत।

i) तस्य ii) कर्तुम् iii) इति iv) प्रोक्तम्

ग) 'कथितुम्' इत्यस्य पदस्य कः पर्यायः श्लोके आगतः ?

i) कर्तुम् ii) विवकेः iii) ईरितः iv) प्रोक्तम्

घ) श्लोके 'सः' कर्तृपदस्य क्रियापदं किम् ?

i) इतिरितः ii) ईरितः iii) इति iv) विवकः

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः।।

**I. एकपदेन उत्तरत।** 2

क) अस्माकं प्रथम धर्मः कः ?

ख) 'आचारः प्रथमः धर्मः' इति केषां वचः ?

**II. पूर्णवाक्येन उत्तरत।** 2

क) विदषां वचः किम् ?

अवक्रता यथा चित्ते तथा वाचि भवेद् यदि। 4

तदेवाहुः महात्मानः समत्वमिति तथ्यतः।।

**अन्वयः** – यथा i)______चित्ते तथा यदि ii) _______ भवेत, iii) ______ तथ्यतः तदेव iv) _____इति आहुः।

**मञ्जूषा** – वाचि, समत्वम्, महात्मानः, अवक्रता

विद्वांस एव लोकेऽस्मि् चक्षुष्मन्तः प्रकीर्तिताः। 4

अन्येषां वदने ये तु ते चक्षुनामनी मते।।

**अन्वयः** – अस्मिन् लोके i)______एव ii) _______ प्रकीर्तिताः। iii) ______ वदने ये ते तु iv) _____मते।

**मञ्जूषा** – अन्येषाम्, चक्षुनामनी, चक्षुष्मन्तः, विद्वांसः

वाक्पटुधैर्यवान् मन्त्री सभायामप्यकातरः। 4

स केनापि प्रकारेण परैर्न परिभूयते।।

**अन्वयः** – (यः) मन्त्री i)______, धैर्यवान् सभायाम् अपि ii) _______ (भवति), सः iii) ______ केन अपि iv) _____न परिभूयते।

**मञ्जूषा** – परैः, अकातरः, वाक्पटुः, प्रकारेण

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः। 4

तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः।।

**अन्वयः** – i)______प्रथमः धर्मः इति एतत् ii) _______ वचः (अस्ति)। तस्मात् iii) ______ अपि विशेषतः iv) _____रक्षेत्।

**मञ्जूषा** – प्राणेभ्यः, सदाचारम्, आचारः, विदुषाम्

**निम्नलिखित रेखाङ्कितपदानि आधृत्य विकल्पानां सहायतया प्रश्ननिर्माणं कुरुत।** 4

क) तत्त्वार्थस्य निर्णयः विवेकेन कर्तुं शक्यः।

i) कस्य ii) कस्याः iii) केषाम् iv) कासाम्

ख) जनः ये तत्त्वार्थनिर्णयः कर्तुं शक्य सः विवेकः ईरितः।

i) किम् ii) कम् iii) काम् iv) कः

ग) अहितं कर्म न कुर्यात्।

i) कम् ii) किम् iii) कीदृशम् iv) कथम्

घ) तत्त्वार्थस्य निर्णयः विवेकेन कर्तुं शक्यते।

i) किम् ii) केन iii) विपत् iv) मिथ्या

**रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।** 4

क) अस्य पिता तपः तेपे।

ख) आचारः प्रथमो धर्मः इति विदुषां वचः।

ग) धैर्यवान् लोके परिभवं न प्राप्नोति।

घ) मन्त्री सभायाम् अकातरः भवेत्।

**निम्नपदानां तैषाम् उचितविलोमपदैः सह मेलनं कुरुत।** 4

क) पक्वः

i) अपरिपक्वः ii) अपक्वः iii) परिणतः iv) क्वथितः

ख) ईरितः

i) कथितः ii) प्रस्द्धिः iii) अकथितः iv) चलितः

ग) श्रेयः

i) सुखम् ii) कल्याणम् iii) प्रेयः iv) धर्मम्

घ) विमूढधीः

i) सुधीः ii) मूर्खः iii) मूर्खबुद्धिः iv) कुबुद्धिः

## पाठ – 9 राष्ट्रं संरक्ष्यमेव हि

परमापद्गतेनापि नैव तात! त्वया रणे।

इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः।।

**I. एकपदेन उत्तरत।** 2

क) अस्मिन् श्लोके सम्बोधनपदं किम् ?

ख) मानुषेषु किं न प्रयोक्तव्यम् ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) इदम् अस्त्रं केषु न प्रयोक्तव्यम् ?

ख) जनः कुत्र परमापद्गतः भवति ?

**III. भाषिककार्यम्।** 4

क) अस्मिन् श्लोके 'युद्धे' इत्यस्य किं पदं प्रयुक्तम् ?

i) नैव ii) रणे iii) इदम् iv) अस्त्रम्

ख) 'इदम् अस्त्रं प्रयोक्तव्यम्' अत्र क्रियापदं किम् ?

i) तव्यम् ii) इदम् iii) अस्त्राम् iv) प्रयोक्तव्यम्

ग) 'इदम्' इति विशेषणस्य विशेष्य पदं किम् ?

i) रणे ii) त्वया iii) अस्त्राम् iv) तात

घ) 'पुत्र' पदस्य कः पर्यायः अत्र श्लोके आगतः ?

i) नैव ii) त्व्या iii) तात iv) रणे

नानाशस्त्रविदः पूर्वे येऽप्यतीता महारथाः।
मनुष्येषु तैः प्रयुक्तं कथञ्चन।।

**I. एकपदेन उत्तरत।** 2

क) महारथैः मनुष्येषु किं न प्रयुक्तम् ?

ख) पूर्व के अतीत ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) महारथाः कीदृशाः आसन् ?

ख) महारथाः पूर्वे केषु ब्रह्मास्त्रं न प्रयुक्तवन्तः ?

**III. भाषिककार्यम्।** 4

क) 'नानाशस्त्रविदः योऽप्यतीताः महारथाः' अत्र क्रियापदं किम् ?

i) अतीताः ii) ये iii) नानाशस्त्रविदः iv) महारथाः

ख) 'महारथाः' इत्यस्य विशेषणपदं किम् ?

i) मनुष्येषु ii) अतीताः iii) नानाशस्त्रविदः iv) पूर्वे

ग) 'प्राचीने काले' इति पदस्य कः पर्यायः अत्र प्रयुक्तः ?

i) तै ii) पूर्वे iii) ये iv) महारथाः

घ) श्लोके 'सदैव' इत्यस्य पदस्य कः विपर्ययः आगतः ?

i) पूर्वे ii) अपि iii) कथञ्चन iv) प्रयुक्तम्

भीमः – (युधिष्ठिरं प्रति) भ्रातः! द्रौणिम् अनुगन्तुं मह्यम् अनुतिं दादातु भवान्।
युधिष्ठिरः – गच्छ वत्स! विजयी भव, नकुलः तव सारथिः भवतु। (भीमसेनः निर्गच्छति, श्रीकृष्णः अर्जुनेन स प्रविशति)।
श्रीकृष्णः – भो धर्मराज! समीचनं न कृतं भवता। पुत्रशोकविह्वलः भीमसेनः एकाकी एव द्रौणिं हन्तुम् अभिधावति।
युधिष्ठिरः – भगवन्! सः तु एकाकी एव द्रोणपुत्राय अलम्।
श्रीकृष्णः – वत्स! न जानाति भवान् द्रौणेः चपलां प्रकृतिम्। पितुः द्रोणात् प्राप्तं ब्रह्मशिरो नाम अस्त्रं विद्यते तस्य पार्श्वे। यदि तत् प्रयुज्यते, सर्वा पृथ्वी दग्धा स्यात् ?

**I. एकपदेन उत्तरत।** 2

क) कः एकाकी एव द्रोणपुत्राय अलम् आसीत् ?

ख) श्रीकृष्णः युधिष्ठिरं केन पदेन समबोधयति ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) यदि ब्रह्मास्त्रं प्रयुज्यते तदा पृथ्वी कीदृशी स्यात् ?

ख) भीमस्य सारथिः कः भवतु ?

**III. भाषिककार्यम्।** 4

क) 'दुरे' अस्य विपर्ययः संवादे कः प्रयुक्तः ?

i) पार्श्वे ii) निकटे iii) समीपे iv) गृहे

ख) 'अश्वत्थामानम्' अस्य किं पर्यायपदं संवादे प्रयुक्तम् ?

i) समीचीनम् ii) प्रथचपलम् iii) द्रौणिम् iv) प्रकृतिम्

ग) 'चपलां प्रकृतिम्' अनयोः किं विशेषणपदम् ?

i) प्रकृतिम् ii) प्रकृतिः iii) चपलाम् iv) चपला

घ) 'भीमः तं हन्तुम् अभिधावति' अत्र क्रियापदं किम् ?

i) अभिधावति ii) तम् iii) हन्तुम् iv) भीमः

युधिष्ठिरः – सम्प्रति आश्वस्तः अस्मि। मन्ये सः ब्रह्मप्रयोगं न करिष्यति।
श्रीकृष्णः – तर्हि न जानासि तस्य मनोवृत्तिम। पितुः उपदेशेन असन्तुष्टः स एदा द्वारकापुरीम् आगच्छत्। ब्रह्मास्त्रं दत्त्वा सः सुदर्शनचक्रम् अवाञ्छत्।
युधिष्ठिरः – (साश्चर्यम्) कथं चक्रम् इति!
श्रीकृष्णः – आम्! मया कथितम्। नाहं त्वत्तः ब्रह्मास्त्रम् इच्छामि। यदि त्वं मम गदां, शक्तिं, धनुः चक्रं वा इच्छसि, तुभ्यं ददामि।
युधिष्ठिरः – ततस्ततः।

**I.** **एकपदेन उत्तरत।** 2

क) द्रौणिः श्रीकृष्णं किम् अवाञ्छत् ?

ख) श्रीकृष्णः तस्मात् किं न इच्छति ?

**II.** **पूर्णवाक्येन उत्तरत।** 4

क) श्रीकृष्णः द्रौणिने किं किं दातुम् इच्छति ?

ख) द्रौणिः एकदा कुत्र आगच्छत् ?

**III.** **भाषिककार्यम्।** 4

क) नाट्यांशे 'अवाञ्छत्' इति क्रियायाः कर्तृपदं किम् ?

i) सः ii) सुदर्शनम् iii) चक्रम् iv) गदाम्

ख) 'धर्मः' इति पदस्य विशेषणपदं किम् ?

i) आचारः ii) विशेषतः iii) वचः iv) प्रथमः

ग) 'स एकदा द्वारकापुरीम् आगच्छत्।' अस्मिन् वाक्ये क्रियापदं किम् ?

i) एकदा ii) स iii) द्वारकापुरीम् iv) आगच्छत्

घ) 'गृहीत्वा' इति पदस्य कः विपर्ययः अत्र प्रयुक्तः ?

i) ददामि ii) दत्त्वा iii) अवाञ्छत् iv) त्वत्तः

नानाशस्त्रविदः पूर्वे येऽप्यतीती महारथाः। 4
नैजदस्त्रं मनुष्येषु तैः प्रयुक्तं कथञ्चन।।

**अन्वयः** –पूर्वे ये अपि नानाशस्त्रविदः i)____अतीताः तैः ii) _____एतत् iii) ____कथञ्चन iv) ____प्रयुक्तम्।

**मञ्जूषा** – न, महारथाः, मनुष्येषु, अस्त्रम्

पाण्डवास्त्वं च राष्ट्रं च सदा संरक्ष्यमेव हि। 4
तस्मात् संहर दिव्यं त्वमस्त्रमेतन्महाभुज।।

**अन्वयः** – पाण्डवाः त्वम् च i)_____च सदा ii) _____ एव हि iii) _____! तस्मात् त्वम् एतत् iv) _____अस्त्रम् संहर।

**मञ्जूषा** – महाभुज, संरक्ष्यम्, राष्ट्रम्, दिव्यम्

परमापद्गतेनापि नैव तात त्वया रणे। 4
इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः।।

**अन्वयः** – i)______परमापद्गतेन अपि ii) _______ रणे इदम् अस्त्रं iii) ______ मानुषेषु न iv) ______प्रयोक्तव्यम्।

**मञ्जूषा** – विशेषतः, तात!, एव, त्व्या

नानाशस्त्रविदः पूर्वे येऽप्यतीता महारथाः। 4
नैतदस्त्रं मनुष्येषु तैः प्रयुक्तं कथञ्चन।।

**अन्वयः** – i) नानाशस्त्रविदः ये ______पूर्वे महारथाः ii) _______ तैः एतद् iii) _____ मनुष्येषु न iv) _____प्रयुक्तम्।

**मञ्जूषा** – अतीताः, अपि, अस्त्रम्, कथञ्चन

**रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।** 3

क) मन्दभाग्या अहं धैर्यं धारयामि।

ख) त्वम् अद्य मया वध्योऽसि।

ग) सहस्रांशुः न भासते।

**विकल्पेभ्यः चित्वा शब्दार्थमेलनं क्रियाताम्।** 4

क) समीचीनम्

i) त्यज ii) गच्छ iii) उचितम् iv) सर्वतः

ख) स्वगतम्

i) ज्ञात्वा ii) सर्वतः iii) मनसि iv) उचितम्

ग) परितः

i) ज्ञात्वा ii) सूर्यः iii) सर्वतः iv) मनसि

घ) विज्ञाय

i) सूर्यः ii) ज्ञात्वा iii) सर्वतः iv) मनसि

**निम्नलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य विकल्पानां सहायतया प्रश्ननिर्माणं कुरुत।** 4

क) नकुलः तव सारथिः भवतु ।

i) कः ii) कौ iii) के iv) काः

ख) यद्–यद् इच्छसि चेदस्त्रं तद्–तद् एव ददामि ते।

i) के ii) काः iii) कः iv) कस्मै

ग) त्वम् अपि निज अस्त्रं संहर।

i) कम् ii) किम् iii) कः iv) के

घ) नकुलः <u>तव</u> सारथिः भवतु।

i) कः ii) किम् iii) कस्य iv) केन

## पाठ – 10 सुस्वागतं भो! अरुणाचलेऽस्मिन

पर्यटनाधिकारी – साधु पृष्टम्। अत्रे अनेके प्रमुखोत्सवाः। 'वाङ्.चो' जनजातीनां प्रमुखं पर्व 'ओरिया' इति अस्ति। एतत् तु 'फरवरी' इति मासे मान्यते। अस्मिन् अवसरे कृषिभूमिपूजनं सेतुनिर्माणं च सामाजिकं कार्यं क्रियते। 'मोपीन' इति अपि कृषिपर्व अस्ति। देवानामपि देवः 'मोपिन' इति कथ्यते। 'होली सदृशम् एव पर्व इदम्। जनाः परस्परं मुखे कपोले च शालिचूर्णं लिम्पन्ति। इदम् 'अप्रैल' इति मासे मान्यते। 'ओणम्' पर्व समं 'साडकेन' एकम् अन्यत् पर्व अस्ति। लामासम्प्रदायस्य 'लोसर' इति प्रमुखं पर्व अपि 'फरवरी' इति मासे सम्पद्यते।

**I. एकपदेन उत्तरत।** 2

क) जनाः मुखे किं लिम्पन्ति ?

ख) किं पर्व 'फरवरी' मासे सम्पद्याते ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) 'ओरिया' पर्वावसरे किं कार्यं क्रियते ?

ख) देवानाम् अपि देवः कः कथ्यते ?

**III. भाषिककार्यम्।** 4

क) 'लिम्पन्ति' इति क्रियायाः कर्तृपदं किम् ?

i) परस्परम् ii) मुखे iii) जनाः iv) कपोले

ख) 'सदृशम्' इति पदस्य कः पर्यायः अनुच्छेदे प्रयुक्तः ?

i) समम् ii) पर्व iii) एकम् iv) अन्यत्

ग) 'एकम् अन्यत् पर्व' एतेषु पदेषु विशेष्यः कः ?

i) पर्व ii) एकम् iii) अन्यत् iv) एकः

घ) 'सामान्यम्' इत्यस्य कः विपर्ययः अत्र प्रयुक्तः ?

i) प्रमुख् ii) अन्यत् iii) समम् iv) सदृशम्

परशुरामकुण्डं तु लोहितनद्याः किञ्चिद्दूरे अस्ति। पूर्वम इदं ब्रह्माकुण्डम् आसीत्। इदं लोहितनद्याः उद्गमस्थलम् इति मन्यते। अत्र अनेकानि अन्यानि दर्शनीयानि सथलानि अपि सन्ति। अस्मांक पर्यटनविभागेन प्रकाशितां केषांञ्चित् प्रसिद्धस्थलानां सूचीं पठित्वा ज्ञायताम् इमानि पर्यटनस्थलानि। एतेषां दर्शनाय सम्पूर्णा व्यवस्था वर्तते। कार्यक्रमस्तु सुनिशिचतः।

**I. एकपदेन उत्तरत।** 2

क) परशुरामकुण्डं कस्याः उद्गमस्थलं मन्यते ?

ख) कस्तावत् सुनिश्चितः वर्तते ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) परशुरामकुण्डं कुत्र अस्ति ?

**III. भाषिककार्यम्।** 4

क) 'व्यवस्था' इति कर्तृपदस्य क्रियापदं किम् ?

i) आसीत् ii) मन्यते iii) वर्तते iv) अस्ति

ख) 'एतेषाम्' इति सर्वनामपदं केभ्यः प्रयुक्तम् ?

i) कुण्डेभ्यः ii) पर्यटनस्थलेभ्यः iii) कार्यक्रमेभ्यः iv) पर्यटनविभागेभ्य

यः सप्तराज्येषु विभासमानः,
तरङ्.गिणी यत्र च लोहिताख्या।
'ईटा' हि यस्यास्ति पुरी प्रधाना,
सुस्वागतं भो! अरुणाचलेऽस्मिन्।।

**I. एकपदेन उत्तरत।** 2

क) कः सप्तराज्येषु विभासमानः अस्ति ?

ख) लोहिताख्या तरङ्.गिणी कुत्र प्रवहति ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) अरुणाचलस्य प्रधाना पुरी काऽस्ति ?

ख) अरुणचले का नामधेया नदी वहति ?

**II. भाषिककार्यम्।** 4

क) 'अरुणाचलेऽस्मिन्' अत्र विशेषणपदं किम् अस्ति ?

i) अस्मिन् ii) अरुणाचले iii) अरुणाचलः iv) इदम्

ख) 'यः सप्तराज्येष' अत्र 'यः' पदं कस्मै प्रयुक्तम् ?

i) प्रधानायै ii) पूर्यै iii) विभासमानायै iv) अरुणाचलाय

ग) **श्लोके 'अस्ति' क्रियापदस्य कर्तृपदं किम्**

i) ईटा ii) पुरी iii) प्रधाना iv) यस्य

घ) 'नदी' इति पदस्य कः पर्यायः श्लोके लिखितः ?

i) तरङ्.गिणी ii) प्रधाना iii) पुरी iv) लोहिताख्या

**निम्नलिखितेवाक्येषु रेखाङ्.कितपदानि आधृत्य विकल्पनां सहायतया प्रश्ननिर्माणं कुरुत।** 4

क) देवानाम् देवः मोपीनः इति कथ्यते।

i) के ii) केषाम् iii) कासाम् iv) काम्

ख) 'ईटानगरम्' अस्य प्रदेशस्य राजधानी अस्ति ?

i) कम् ii) किम् iii) काम् iv) कान्

ग) अरुणः तु सूर्यस्य पर्यायः।

i) कः ii) के iii) कस्य iv) कस्याः

घ) हिमाद्रितुङग्.श्रृङै्ग सुशोभिता सूर्योदयभूमिः इयम्।

i) के ii) काभिः iii) कैः iv) काः

**रेखाङ्.कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।** 4

क) एतत् कुण्डं लोहितनद्याः किञ्चिद्दूरे अस्ति।

ख) अहम् इदं स्थानम् जानामि।

ग) इदं लोहितनद्याः उद्मस्थलम् इति मन्यते।

घ) जनाः मुखे कपोले च शालिचूर्णं लिम्पन्ति।

## पाठ – 11 कालोऽहम्

कालोऽहम्। अहं खलु कालः। विश्वस्य आत्माऽहम्। कलयामि गणयामि जगतः आयुः प्रमणणम्। सततं चक्रवत् परिवर्तमानः भूतं वर्तमानं भविष्यदपि च वीक्षमाणः अहमेव साक्षी जगतः उत्पत्तेः विकासस्य प्रलयस्य च। इदं जगत् तु पुनः जायते विलीयते च परमहं सर्वदा विद्यमानोऽस्य सर्वं क्रियाकलापं पश्यामि। अहो! किं जानीथ यूयम्, कियती प्राचीना इयं सृष्टि!' नैव! तर्हि श्रृणुत् ध्यानेन।

**I. एकपदेन उत्तरत।** 2

क) कालः कस्य आत्मा अस्ति ?

ख) अस्य गद्यांशस्य कः वक्ता अस्ति ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) कः सततं चक्रवत् परिवर्तमानः सर्वं च वीक्षमाणः जगतः साक्षी अस्ति ?

ख) जगतः आयुः कः गणयति ?

**III. भाषिककार्यम्।** 4

क) 'दृश्यमाणः' इत्यर्थे अत्र कः शब्दः प्रयुक्तः ?

i) वीक्षमाणः ii) कुर्वाणः iii) विद्यमानः iv) परिवर्तमानः

ख) 'जायते' पदस्य किं विपर्ययपदं गद्यांशे प्रयुक्तम् ?

i) पुनः पुनः ii) विलीयते iii) स्थीयते iv) गीयते

ग) 'कलयामि' अस्य कः पर्यायः अत्र प्रयुक्तम् ?

i) ग्च्छामि ii) पश्यामि iii) गणयामि iv) गायमि

घ) 'नैव'! तर्हि श्रृणुत ध्यानेन।' अत्र क्रियापदं किम् ?

i) ध्यानेन ii) तर्हि iii) नैव iv) श्रृणुत

विष्णोराज्ञया प्रवर्तमानस्य ब्रह्मणः द्वितीयपरार्धे श्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमचरणे जम्बूद्वीपे भारतवर्षे भररतखण्डे आर्यावर्तैकदेशे यमुनातीरे दिल्लीमण्डले 'नन्दन' नाम संवत्सरे, सूर्योत्तरायणे, वसनततौ, चैत्रमासे, शुक्लपक्षे, प्रतिपदायाम् तिथौ गुरुवासरे, उत्तराभाद्रपदनक्षेत्रे, शुक्लयोगे, किंसतुघ्नकरणे......नामाहम् मङ्.गलकार्यं करिष्ये।

**I. एकपदेन उत्तरत।** 2

क) कस्य आज्ञया जनः मङ्.गलकार्यं करिष्यति ?

ख) असिमन् अनुच्छेदे कस्य प्रदेशस्य वर्णनम् अस्ति ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) अनुच्छेदे आगतयोः मासपक्षयोः नामनी लिखत।

ख) यजमानः किं कार्यम् कर्तुम् इच्छति ?

**III. भाषिककार्यम्।** 2

क) 'विषणोः आज्ञया अहम् अद्य इदं मङ्.गलकार्य करिष्ये।' अत्र क्रियापदं किम् ?

i) आज्ञया ii) विष्णोः iii) करिष्ये iv) मङ्.गलकार्यम्

ख) अनुच्छेदे 'करिष्ये' इति क्रियापदस्य कर्तृपदं किम् ? ?

i) तिथौ ii) प्रतिपदाम् iii) प्रतिपदायाम् iv) तिथिः

षड् ऋतव एव मे नाभयः। द्वादशमासा एव अक्षत्वेन गण्यन्ते। चतुर्विंशतिः पक्षा एव पर्वणि। षष्ट्युत्तर– त्रिशतानि दिनानि एव अराणि। परमहम् अखण्डः, शाश्वतः विभुः च। नूतनसंवत्सरोत्सवदिवसे इदानीम् इयमेव में शुभाशंसा।

**I. एकपदेन उत्तरत।** 2

क) कालस्य नाभयः कति ?

ख) कालः नूतनसंवत्सरोत्सवे जनेभ्यः किं यच्छति ?

**II. पूर्णवाक्येन उत्तरत।** 4

क) कालस्य अराणि कानि सन्ति ?

ख) कालः कीदृशोऽस्ति ?

**III. भाषिककार्यम्।** 2

क) 'खण्डितः' इति पदस्य कः विपर्ययः अनुच्छेदे प्रदत्तः ?

i) परमाहम् ii) विभुः iii) अखण्डः iv) शाश्वतः

ख) 'इयमेव मे शुभाशंसा'। अत्र 'मे' पदं कस्मै प्रयुक्तम् ?

i) जनाय ii) कालाय iii) ईश्वराय iv) सूर्याय

ग) 'गण्यन्ते' इति क्रियायाः कर्तृपदं किम् ?

i) द्वादश ii) एव iii) अक्षत्वेन iv) द्वादशमासाः

घ) अनुच्छेदे 'दिवसाः' इति पदस्य कः पर्यायः आगतः ?

i) दिनानि ii) त्रिशतानि iii) एव iv) अराणि

सर्वस्तरतु दुर्गाणि, सर्वो भ्रदाणि पश्यतु।
सर्वः कामनवाप्नोतु, सर्वः सर्वत्र नन्दतु।।

**अन्वयः** – सर्वः दुर्गाणि i)______, सर्वः भद्राणि पश्यतु। सर्वः ii) _______ अवाप्नोतु, सर्वः iii) _______ नन्दतु।

**मञ्जूषा** – तरतु, सर्वत्र, कामान्

**निम्नलिखितेवाक्येषु रेखाङ्.कितपदानि आधृत्य विकल्पनां सहायतया प्रश्ननिर्माणं कुरुत।** 4

क) कियती प्राचीना इयं सृष्टिः।

i) का ii) काः iii) कः iv) कति

ख) एकः कल्पः एव ब्रह्मणः एकं दिनं मन्यते।

i) कः ii) कस्य iii) काः iv) किम्

ग) संवत्सरे षड् ऋतवः भवन्ति ?

i) कः ii) किम् iii) कीदृशः iv) कति

घ) ब्रह्मणः आयुः शतं वषाणि।

i) कस्य ii) कति iii) कासाम् iv) केषाम्

**रेखाङ्.कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।** 4

क) सूर्यस्य द्वे गती– उत्तरायणं दक्षिणायनञ्च।

ख) अहम् मङ्.गलकार्यं करिष्ये।

ग) अहम् अखण्डः शाश्वतः विभुः च अस्मि।

घ) कश्चन विद्वान सङ्.कल्पवाचनं करोति।